अथ

नारायणबलिः

प्रारभ्यते

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

संस्करण : जनवरी २०१४, संवत् २०७०

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

मूल्य : ४५ रुपये मात्र

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass
Prop. Shri Venkateshwar Press, Mumbai-400004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate,
Pune -411 013.

॥ श्रीगणेशायनमः ॥ ॥ अथयजुर्वेदोक्तनारायणबलिर्लिख्यते ॥ तत्रादौस्नानविधि
नास्नात्वा यस्यकातीयप्रयोगः यथोक्तमृत्तिकामार्द्रगोमयंचकुशान्कृष्णतिलान्सु
रभिपुष्पाण्यादाय सुमना नद्यादिकंगत्वातत्तीरेशुचौपृथक्पृथक् स्थापयेत् । ततःपा
णिपादंप्रक्षाल्यकुशहस्तोबद्धशिखोयज्ञोपवीती आचामेत् ततः ।ॐउरुं हिराजावरु
णश्चकारसूर्यायपंथामन्वेतवाउ ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित
नमोवरुणायाभिष्टितोवरुणस्यपाशः इतितोयमामंत्र्य ॐ येतेशतंवरुणयेसहस्रंयज्ञि
याःपाशाविततामहान्तः । तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः इति ।
त्रिःप्रदक्षिणंजलमावर्तयेत।ततः सुमित्रियानऽआपऽओषधयःसंतुइतिजलांजलिमादा
य ॐ दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः । इतिद्वेष्यंप्रतिनिषिंचेत् ।ततःक
टिंबस्त्यूरुजंघेचरणौकरौप्रत्येकंमृत्तोयाभ्यांत्रिस्त्रिःप्रक्षाल्य एकंपादंजलेऽपरंचस्थ

लेनिधायाचामेत् । ततउदकंनमस्कृत्य ॐतीर्थोदकायनमइतिॐइदंविष्णुर्विचक्रमेत्रे
धानिदधेपदम् । समूढमस्यपा ँ सुरे इतिमृत्तिकयांगानिसंस्पृश्यनाभिमात्रंजलंप्रवि
श्यआपोऽअस्मान्मातरः शुंधयंतुघृतेननोघृतप्वःपुनंतु।विश्व ँहिरिप्रंप्रवहंतिदेवीरिति
मंत्रेणसूर्याभिमुखोनिमज्जेत् ततः स्नात्वा ॐ उदिदाभ्यः शुचिरापूतऽएमिइतिनिम
ज्ज्योन्मज्ज्याचम्य ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः
मानोवीरान्रुद्रभामिनोवधीर्हविष्मंतःसदमित्वाहवामहे इतिमंत्रेणगोमयेनांगानिवि
लिंपेत् ततः ॐ इमंमेवरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके ॥१॥ ॐ तत्त्वायामि
ब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोवरुणेहबोध्युरुश समानऽ
आयुःप्रमोषीः॥२॥ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः।यजिष्ठो
वह्नितमःशोशुचानोविश्वाद्वेषा ँ सिप्रमुमुग्ध्यस्मत्॥३॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीने

दिष्ठोऽअस्याऽउषसोव्युष्टौ ।अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधि॥४॥
ॐआपोमोषधीर्हिꣳसीर्धाम्नोधाम्नोराजंस्ततोवरुणनोमुंच।यदाहुरघ्न्याऽइतिवरुणेतिश
पामहेततोवरुणनोमुंच॥५॥ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय ।अथा
वयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥६॥ ॐमुंचंतुमाशपथ्यदथोवरुण्यादुतऽअ
थोयमस्यपडीशात्सर्वस्माद्देवकिल्बिषात्॥७॥ॐ अवभृथनिचुंपुणनिचेरुरसिनिचुंपुणः
अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरराव्णोदेवरिषस्पाहि ॥८॥ इत्यष्टभिर्मंत्रै
र्हस्तेनप्रत्येकंशिरसिजलंप्रक्षिपेत् ततोवहतिजलेप्रवाहाभिमुखः स्थिरेसूर्याभिमुखोमौ
नीशनैरिवनिमज्जेत्ततआचम्य ॐकारव्याहृतिगायत्रीभिरापोहिष्ठेत्यादितिमृभिः
इदमापःप्रवहतावद्यंचमलंचयत । यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणमापोमातस्मा
देनसपवमानश्चमुंचतु॥१॥ ॐहविष्मतीरिमाऽआपोहविष्मांऽआविवासति ।हविष्मा

न्देवोऽअध्वरोहविष्माँऽअस्तुसूर्यः॥ २॥ ॐदेवीरापोऽअपांनपाद्योवऽऊर्मिर्हविष्मऽइंद्रि
यावान्मदिन्तमः ।तंदेवेभ्योदेवत्रादत्तशुक्रयेभ्योयेषांभागस्थस्वाहा॥३॥ॐकार्षिरसिस
मुद्रस्यत्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मतसमोषधीभिरोषधीः॥४॥ ॐअपोदे
वामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः । याभिर्मित्रावरुणावभ्यर्षिंचन्याभिरिं
द्रमनयन्नत्यरातीः॥५॥ॐद्रुपदादिवमुमुचानः स्विन्नःस्नातोमलादिवपूतंपवित्रेणेवाज्य
मापःशुन्धंतुमैनसः॥६॥ॐशन्नोदेवीरभिष्टयऽआपोभवंतुपीतयेशंयोरभिस्रवंतुनः॥७॥
ॐअपा २ रसमुद्वयस २ सूर्येसंत २समाहितम्।अपा २ रसस्ययो रसस्तंवो गृह्णाम्युत्त
ममुपयामगृहीतोसींद्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम् ॥८॥ ॐआपोदे
वीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः। तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः
॥९॥ॐपुनंतुमापितरः सोम्यासः पुनन्तुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशता

युषा पुनन्तुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥१०॥
ॐ अग्नऽआयू ꣳषिपवसऽआसुवोर्जमिषंचनः। आरेबाधस्वदुच्छुनाम्॥११॥ॐपुनंतुमा
देवजनाःपुनंतुमनसाधियः। पुनंतुविश्वाभूतानिजातवेदः पुनीहिमा॥१२॥ॐपवित्रेणपु
नीहिमाशुक्रेणदेवदीद्यत।अग्नेक्रत्वाक्रतू ꣳरनु।१३॥ॐयत्तेपवित्रमर्चिष्यग्नेविततमंतरा
ब्रह्मतेनपुनातुमा॥१४॥ॐपवमानः सोऽअद्यनः पवित्रेणविचर्षणिः। यः पोतासपुनातुमा
॥१५॥ॐउभाभ्यांदेवसवितःपवित्रेणसवेनवच।मांपुनीहिविश्वतः ॥१६॥ ॐवैश्वदेवीपुन
देतीऽयागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः॥ तयामदंतः सधमादेषुवय ꣳस्यामपत
योरयीणाम्॥१७॥ ॐ चित्पतिर्मांपुनातुवाक्पतिर्मापुनातुदेवोमासवितापुनात्वच्छिद्रे
णपवित्रेणसूर्यस्यरश्मिभिः। तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम्
॥१८॥ इतिप्रत्येकमंत्रैः पुनरोंकारव्याहृतिगायत्रीभिरापोहिष्ठेतितिसृभिः कुशत्रयेण

मार्जनंकुर्यात् ततः पूर्ववदिमंमेवरुणइत्याद्यष्टमंत्रैःशिरसिजलंक्षिपेत् ततःऋष्यादिं
कंस्मृत्वाजलेमग्नोऽघमर्षणंद्रुपदांवाआयंगौरितिवा त्र्यृचंत्रिरावर्तयेत् वक्ष्यमाणमं
त्रैस्त्रिरावर्तैः प्राणायामंकुर्यात ओंकारंवात्रिरावर्तयेत्विष्णुंवास्मरेत ततः बहिराग
त्यवस्त्रादिधृत्वातिलकंकृत्वासंध्यावंदनादिकुर्यात्अथवापुराणोक्तस्नानविधिमपिकु
र्यात तदनंतरंवस्त्रधारणादिकुर्यात। ॐनमोनारायणायेतिमूलमंत्रेणसमंततश्चतुर्हस्तं
चतुरस्रंतीर्थंप्रकल्प्यतत्रगंगामावाहयेदेभिर्मंत्रैः। विष्णोः पादात्प्रसूतासिवैष्णवीविष्णु
पूजिता।पाहिनस्त्वेनसस्तस्मादाजन्ममरणांतिकात्॥१॥ विष्णुपादाब्जसंभूतेगंगेत्रिप
थगामिनि। धर्मद्रवीतिविख्यातेपापंमेहरजाह्नवि॥२॥ तिस्रःकोट्योर्धकोटीचतीर्थानां
वायुरब्रवीत्। दिविभुव्यंतरिक्षेचतानितेसंतिजाह्नवि॥३॥नंदिनीत्येवतेनामदेवेषुनलिनी
तिच। वृन्दापृथ्वीचसुभगाविश्वकायाशिवारिता॥४॥ विद्याधरीसुप्रसन्नातथालोकप्रसा

दिनी।क्षमाच जाह्नवीचैवशांताशांतिप्रदायिनी ॥५॥ एतानिपुण्यनामानिस्नानकालेप्र
कीर्तयेत । भवेत्संनिहितातस्यगंगात्रिपथगामिनी॥६॥ इतिगंगामावाह्यततःपूर्वोक्तमूल
मंत्रेणकरसंपुटस्थितजलंसप्तवाराभिमंत्रितंत्रिचतुःपंचसप्तवारंवास्वमूर्ध्निक्षिपेत ततोमृ
त्तिकांगृहीत्वाॐअश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे । मृत्तिकेहरमेपापंयन्मयादुष्कृतं
कृतम्॥१॥उद्घृतासिवराहेणकृष्णेनशतबाहुना । नमस्तेसर्वलोकानांप्रभवारणिसुव्रते
॥२॥आरुह्यममगात्राणिसर्वपापंप्रमोचय॥३॥ एभिःश्लोकैरामंत्र्यतयामृदागात्राण्याल
भ्यमज्जनंकुर्यात्ॐनमोनारायणेत्यारभ्यपौराणस्नानविधिः सर्ववर्णसाधारणः। इत्या
चारादर्शेस्नानविधिप्रयोगः॥ ततआचम्यॐतत्सदित्युच्चार्यअद्येत्यादिअमुकगोत्रस्या
मुकप्रेतस्यऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टसंध्याशौचलोपाकृतस्नानमरणाशौ
चमरणहरिनामोच्चारणवर्जितमरणपंचगव्यरहितविकल्पहृदयभाषादिचैतन्यम्लेच्छ

भाषादिवक्तव्यास्पर्शनादिरक्तदर्शनाधर्मधर्मचिंतनविष्णुवर्जितादत्तमरणाभावम
वक्रियाकर्मरहितमार्जारमूषकादिस्पर्शतृणस्पर्शदृष्टिदोषद्वात्रिंशद्दोषापरचतुःषष्टिदो
षाष्टशल्यारजस्वलासंमार्जिनीसूतिकादिसंसर्गस्पर्शदृष्टिदोषपरिहारार्थं मरणकाले
तथा दहनकालेअविधिकृतस्नान आचंद्रार्कयावत् यन्मरणांतकविशुद्ध्यर्थम्
उपनयनपापपरिहारार्थंदेहशुद्ध्यर्थं महापातकोपपातकतत्समानवर्जितानांगुरुल
घुपापानाम् आतुरावस्थायामभक्ष्यभक्ष्याभोज्यभोजनापेयपानाद्यगम्यागमनक्रि
यालोपोत्पन्नपरदेशपरज्ञातीयपरगृहेमरण अर्द्धदाहेजलेनचिताशमने दक्षिणाय
ने पंचकमध्येत्रिपुष्करयमलयोगे रात्रौ कृष्णपक्षे गुरुहीनेरुद्राक्षधात्रीतुलसीतिल
सर्षपगोपीचंदनगंगोदकस्नपनरहितशववाहे तथामार्गेशौचदेशेखर्परास्थिचर्मामे
ध्यकेशादिस्पर्शेअतीर्थेपरकाष्ठे पराग्निदाहेमुखआज्याहुतिरहितेकीटपतंगपक्षिचि

तामध्यज्वलितादिदोषपरिहारार्थं कुगतिनिवारणार्थमुत्तमलोकावाप्त्यर्थं नारायण
बल्यधिकारसिद्ध्यर्थंपंचदशप्राजापत्यात्मकंप्रायश्चित्तंप्रतिप्राजापत्यंगोमूल्यरजता
दिप्रत्याम्नायद्वारायथाकालेअहमाचरिष्ये होमजपादितीर्थयात्राद्वाराकुर्यात् अथ
वान्यःसंकल्पः कार्यः स यथा ॐ तत्सदित्यादिअमुकगोत्रस्यामुकप्रेतस्यशृंगिदं
ष्ट्रिनखिशस्त्रघातसर्पजलमग्नकण्ठग्राहविषभक्षणाग्निदग्धविप्रमारितात्मघातचण्डाल
हस्तमरणचौरमारितशत्रुमारितम्लेच्छादिमारिताष्टशल्यामरणवृक्षारोहणबन्दिग्रह
णपाशमरणविषूचिकाभूतशाकिनीत्यादिग्रहगृहशकटादिहतगजदन्तपर्वतारोहणादि
विकलचित्तभ्रमविकृत्यात्तपाषाणहतकुष्ठव्याधिमरणमहारोगप्रपीडितक्षयव्याधिमर
णपापान्नपोषितमूत्रपुरीषस्थाशौचमरणापस्माररोगादिभगंदरगंडमालपांडुरोगाद्यने
कदुष्टमरणदोषमध्ये संभावितदोषपरिहारार्थं कुगतिनिवारणार्थमुत्तमलोकावा

प्त्यर्थं नारायणबल्यधिकारसिद्ध्यर्थम् अतिकृच्छ्रचांद्रायणद्वयम् अथवा पंचद
शप्राजापत्यात्मकं प्रायश्चित्तं प्रतिप्राजापत्यंधेन्वादिदानरूपं यथाकालेऽहमाचरि
ष्ये जपहोमतीर्थयोजनयात्रादिद्वारावाकुर्यात् एवमूर्ध्वोच्छिष्टाधरोच्छिष्टोभयो
च्छिष्टास्पृश्यस्पृष्टखट्वास्तरणादिस्थमरणे पंचदशद्वादशषट्त्रीन्वा प्राजपत्या
न्कुर्यात् ॥ अथचैवंप्रयोगः ॥ ॥ ॐअद्येत्यादि० अमुकगोत्रस्यामुकप्रेतस्यसर्प
दष्टमृतस्यसर्पदंष्ट्रमरणजनितपापनिवृत्त्यर्थम् असद्गतिनिवारणार्थम् उत्तमलोकप्रा
प्त्यर्थं नारायणबल्यधिकारसिद्ध्यर्थं पंचदशप्राजापत्यात्मकंप्रायश्चित्तंप्रतिप्राजाप
त्यंगोमूल्यादियथाकालेयथाशक्तिअहमाचरिष्ये अथान्यएवंसंकल्पः ॐ तत्सदि
त्युच्चार्यद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्यमरणक्षणेप्राणोत्क्रांतिसमये स्पर्शास्प
र्शविदेशमरणाष्टशल्योपरिमरणाधरोच्छिष्टोर्ध्वोच्छिष्टोभयोच्छिष्टम्लेच्छादिहस्तश

स्त्राघातविषादिदोषान्यदुर्मरणजनितदोषनिवृत्त्यर्थं विष्णुलोकप्राप्त्यर्थं दाल्भ्यो
क्तप्रायश्चित्तं नारायणबलिकर्माधिकारसिद्ध्यर्थं पंचचत्वारिंशत्प्राजापत्यात्मकं प्रा
श्चित्तं प्रतिप्राजापत्यं गोदानप्रत्याम्नायद्वारायथाशक्तिअहमाचरिष्ये प्रायश्चित्त
संकल्पानुसारेण सर्वं कृत्वा ततःपुनराचम्य ॐ तत्सदद्येत्याद्युच्चार्य अमुकगोत्रस्या
मुकदुर्मरणदोषपरिहारार्थमुत्तमलोकप्राप्त्यर्थं नारायणबलिंकरिष्येइति संकल्पंकृ
त्वा पुनस्तिथ्याद्युक्त्वामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तनारायणबलिपूर्वा
गभूतं श्रीमहाविष्णोः षोडशोपचारैः पूजनमहंकरिष्ये इति संकल्प्य पूजांकुर्यात् ॥
तद्यथा आदौपुरुषसूक्तेन । हस्तयोः पादयोर्जान्वोः कट्योर्नाभौहृदिक्रमात् । कंठे
बाह्वोर्मुखेनेत्रेमूर्ध्निवामांगतोन्यसेत् स्वशरीरेतथादेवांगेचन्यासः ॐ सहस्रशीर्षा०
वामहस्ते पुरुषऽएवेद॑० दक्षिणहस्ते । एतावानस्य० वामपादे । त्रिपादूर्ध्व० दक्षिण

पादे। ततोविराडजा ०वामजानुनि । तस्माद्यज्ञात्सर्वहुतःसंभृतं० दक्षिणजानुनि। तस्मा
द्यज्ञात्सर्वहुतऽऋचः०वामकट्याम्। तस्मादश्वा ०दक्षिणकट्याम् । तंयज्ञं०नाभौ । यत्पु
रुषं० हृदये। ब्राह्मणोस्य०कंठे। चंद्रमा ०वामबाहौ। नाभ्याऽआसीदं० दक्षिणबाहौ ।
यत्पुरुषेण० मुखे। सप्तास्यासन्० नेत्रयोः । यज्ञेन० मूर्ध्नि । एवंयथादेहेतथादेवेन्यासं
कृत्वापूजनंकुर्यात यथा सहस्रशीर्षा० आगच्छदेवदेवेशसंसारार्तिविनाशन। पूजार्थं
त्वंजगन्नाथकुरुमेबहुधाकृपाम् इत्यावाहनम् १ ॐ पुरुषऽएवेद०० नानारत्नमयेदिव्ये
सुनंदाद्युपलक्षिते । एहित्वमासनेविष्णोपट्टवस्त्रविभूषिते इत्यासनम् २ ॐएतावान
स्य० वस्त्रपूतंशुभंवारिशंखेकृत्वाजगद्गुरो । मयानिवेदितंभक्त्याकुरुपाद्यंकृपांविभो
इतिपाद्यम् ३ त्रिपादूर्ध्व० वनमालिञ्जगन्नाथशंखचक्रगदाधर । रुक्मिणीसहितस्त्वं
हिगृहाणार्घ्यमिदंहरे इत्यर्घ्यम् ४ ॐ ततोविराड० भक्त्यासमर्पितंदेवतुभ्यंमेपरमा

त्मने । वासुदेवायनित्यायगृहाणाचमनंविभो इत्याचमनम् ५ ॐ तस्माद्यज्ञात्सर्वहुतः
संभृतम्० पुण्यतीर्थोदकेनाथपंचामृतयुतेनवा । चंदनेनाभिमिश्रेणकुरुस्नानंजगत्प्र
भो इतिस्नानम् ६ ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० शुभ्रंनानाविधंदेवमहार्घंदिव्यमद्भु
तम् वस्त्रंगृहाणदेवेशपवित्रंधौतमुज्ज्वलम् इतिवस्त्रम् ७ ॐ तस्मादश्वा०नवतंतुक
मेवेदंबाहुमूलोपरिस्थितम् । भक्त्यासमर्पितंतुभ्यमुपवीतंगृहाणवै इत्युपवीतम् ८ ॐ
तंयज्ञं० श्रीखंडंदेवदेवेशसुगंधमतिवल्लभम् । गृहाणपरमानंदबहुमूल्यंसुकुंकुमम् ।
इतिचंदनम् ९ ॐ यत्पुरुषं० वल्लभांतेजगन्नाथकोमलातिमनोहराम् । गृहाणतुलसीं
विष्णोययासंतोषितोभुवि। माल्यादीनि० इतिमाल्यम् १० ॐ ब्राह्मणोस्य०श्रीखंडा
दियुतंदिव्यंकृष्णागुरुविमिश्रितम्।भक्त्यासमर्पितंधूपंगृहाणजगदीश्वर इतिधूपम् ।
११ ॐ चंद्रमामनसो० घृतवर्तियुतंदिव्यंरत्नरूपंतमोपहम् । भक्त्यासमर्पितंदीपं

गृहाणपुरुषोत्तम इतिदीपम् १२ ॐनाभ्याऽआसीदं० विपक्वंघृतदुग्धाभ्यांशर्करादियुतं
महत।नानाविधंतुनैवेद्यंगृहाणयदुनंदन इतिनैवेद्यम् १३ ॐयत्पुरुषेण० नमःसर्वहितार्था
यजगदाधारहेतवे।साष्टांगोयंप्रणामस्तेदीनत्वेनमयाकृतः इतिनमस्कारः १४ ॐ स
प्तास्यासन्० हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः। अनंतपुण्यफलदमतःशांतिंप्रयच्छ
मे । पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम् । कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यताम् इति
दक्षिणामुखवासंच १५ ॐयज्ञेनयज्ञ० यानिकानिचपापानिब्रह्महत्यासमानिच । तानि
सर्वाणिनश्यंतिप्रदक्षिणपदेपदे॥आवाहनंनजानामिनजानामिविसर्जनम् । पूजांचैवन
जानामिशरणंमेभवाच्युत। इतिप्रदक्षिणांपुष्पांजलिंच १६ एतत्कृतंयद्विष्णुपूजनंते
नप्रेतस्यविमुक्तिरस्तु श्रीविष्णुःप्रीणातु । तत आचार्यादीनांवरणंकार्यम् स्वयंप्राङ्मु
ख उदङ्मुखंगुरुम् ॐ साधुभवानास्तामितिवदेत ॐ साध्वहमासमितिप्रतिवचनम्

ॐ अर्चयिष्यामोभवंतम्ॐअर्चयेतिप्रतिवचनम् । ततोगंधपुष्पवस्त्रयुग्महेमालंकरणा
दिनागुरुमलकृत्य दक्षिणंजानुंधृत्वा ॐ तत्सदद्येत्याद्युच्चार्य अमुकगोत्रस्यामु
कप्रेतस्यात्महत्यादिनावापाषंडत्वादिनावा जनितपापशमनार्थम् अमुकदुर्मरण
निमित्तदोषनिवृत्तिपूर्वकौर्ध्वदेहिकसंप्रदानयोग्यतासिद्ध्यर्थं नारायणबलिकर्मणि
अमुकगोत्रममुकशर्माणंब्राह्मणमेभिश्चंदनपुष्पाद्यलंकरणवासोभिराचार्यत्वेनत्वामहं
वृणे ॐ वृतोस्मीतिप्रतिवचनम् एवंचतुर्णामृत्विजांवरणंकुर्यात् ॐ अस्ययाग
स्यनिष्पत्त्यैभवंतोऽभ्यर्थितामया । सुप्रसादेनकर्त्तव्यंकर्मेदंविधिपूर्वकम् प्रतिवचनं
करिष्यामः । आचार्याग्रेनालिकेरंनिधायप्रणम्य ततःपूर्वस्यांदिशिस्थंडिलेश्वेतव
स्त्रोपरितंडुलेनाष्टदलंकृत्वातत्रपूर्वाद्यष्टदिक्षुअष्टशक्तीनांस्थापनम् पूर्वे ॐ रुक्मि
णीहागच्छेहतिष्ठरुक्मिण्यैनमः रुक्मिणींस्थापयामि १ आग्नेय्याम् ॐ सत्यभा

मेइहा० २ दक्षिणे ॐ जांबवतीहा० ३ नैर्ऋत्ये ॐ नाग्नजितेइहागच्छेह
तिष्ठ० ४ पश्चिमे ॐ कालिंदीहा० ५ वायव्ये ॐ मित्रविन्देइहा० ६ उत्तरे ॐ
लक्ष्मणेइहा० ७ ईशान्याम् ॐ कैकेयीहागच्छेहतिष्ठ० ८ मध्येकलशं संस्थाप्य
तत्रसत्येशस्थापनम् तद्यथा ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुव
नस्यधर्त्री । पृथिवींयच्छपृथिवींदृ ँ हपृथिवीम्माहि ँ सीः इतिकलशाधारभूमिं
स्पृष्ट्वा ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वादीर्घामनुप्रसि
तिमायुषेधान्देवोवः सविताहिरण्यपाणिः । प्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वाम
हीनांपयोसि इतिकलशाधारधान्यमभिमंत्र्य ॐ आजिघ्रकलशंमह्यात्वाविशंत्वि
न्दवः । पुनरूर्जानिवर्त्तस्वसानःसहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः इति
ताम्रकलशस्थापनम् । ॐ वरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऽ

ऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिवरुणस्यऽ ऋतसदनमासीद इति कलश
मापूर्य ॐ त्वांगंधर्वाअखनस्त्वामिन्द्रस्त्वांबृहस्पतिः। त्वामोषधेसोमोराजावि
द्वान्यक्ष्मादमुच्यतइतिगंधम्। ॐ याऽओषधीः पूर्वाजातादेवेभ्यस्त्रियुगंपुरा। मनैनुब
भ्रूणामह ँ शतंधामानिसप्तच इतिसर्वौषधीः। ॐ कांडात्कांडात्प्ररोहंती परुषःपुरु
षस्परि। एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच इतिदूर्वाः। ॐ अश्वत्थेवोनिषदनंपर्णेवो
व्वसतिष्कृता। गोभाजऽइत्किलासथयत्सनवथपूरुषम् इतिपंचपल्लवान्। ॐ स्योना
पृथिविनोभवान्नृक्षरानिवेशनी। यच्छानःशर्मसप्रथाः इतिपंचसप्तवामृदः ॐ याः
फलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः। बृहस्पतिप्रसूतास्तानोमुंचंत्व ँ हसः
इतिफलम्। ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत। दधद्रत्नानि दाशुषे इतिपंचर
त्नानि। ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत्। सदाधारपृथिवीं

द्यासुतेमांकस्मैदेवायहविषाविधेमइतिहिरण्यम् । ॐ सुजातोज्योतिषासहशर्मवरूथ
मासदत्स्वः । व्वासोऽअग्नेविश्वरूप ꣳ संव्ययस्वव्विभावसो इतिवस्त्रम् ॐ पूर्णादर्विप
रापतसुपूर्णा पुनरापत । वस्नेवव्विक्रीणावहाऽइषमूर्ज ꣳ शतक्रतो इतिधान्यपूर्णपात्रं
निधाय तदुपरिसुवर्णमयींसत्येशमूर्तिमग्न्युत्तारणंकृत्वास्थापयेत् तत्रवह्निसूक्तंप
रशुरामेणोक्तम् समुद्रस्यहिमस्यत्वाअपामिदंनमस्तऋङक् । प्राणदापंचभिर्ऋग्भिर्वह्नि
सूक्तमुदाहृतम् ॥ मूर्तिं पात्रेनिधाय तदुपरिदुग्धधारांजलधारांचपातयेत् सूक्तंवार
द्वयंपठेत ॐ समुद्रस्यत्वावकयाग्नेपरिव्ययामसि । पावकोऽअस्मभ्य ꣳ शिवो
भव १ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि । पावकोऽअस्मभ्य ꣳ शिवोभव ॥२॥
अपामिदन्ययन ꣳ समुद्रस्यनिवेशनम् । अन्यांस्तेऽअस्मत्तपंतुहेतयः पावकोऽ
अस्मभ्य ꣳ शिवोभव ॥ ३ ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे । अन्याँस्तेऽ

अस्मत्तपंतुहेतयः पावकोऽअस्मभ्य ꣳशिवो भव॥४॥प्राणदाऽअपानदाव्यानदावर्चो
दाव्वरिवोदाः। अन्यांस्तेऽअस्मत्तपंतु हेतयः पावकोऽअस्मभ्य ꣳ शिवोभव॥५॥पंचा
मृतेन स्नानं कारयेत्। तन्मंत्राः ॐ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यंतारिक्षेपयो
धाः॥ पयस्वतीः प्रदिशः संतुमह्यम्॥इति पयसा १ ॐ दधिक्राव्णोऽअकारिषंजिष्णोर
श्वस्यव्वाजिनः। सुरभिनोमुखाकरत्प्रणऽआयू ꣳ षितारिषत्॥ इतिदध्ना २ ॐ घृतंघृ
तपावानः पिबतवसांवसापावानः पिबतांतारिक्षस्यहविरसिस्वाहा। दिशःप्रदिशऽआदि
शोव्विदिशऽउद्दिशोदिग्भ्यः स्वाहा इतिघृतेन ३ ॐ मधुव्वाताऽऋतायतेमधुक्षरंति
सिंधवः॥ माध्वीर्नः संत्वोषधीः॥ इतिमधुना॥४॥ ॐ अपा ꣳ रसमुद्वयस ꣳ सूर्येसंत ꣳ
समाहितम्। अपा ꣳ रसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसींद्रायत्वाजुष्टंगृ
ह्णाम्येषतेयोनिरिंद्रायत्वाजुष्टतमम्॥इतिशर्करया॥ ५॥ ॐ आपोहिष्ठामयोभुवस्तानऽ

 ऊर्जंदधातन । महेरणायचक्षसे १ योवः शिवतमोरसस्तस्यभाजयतेहनः । उशतीरिव
 मातरः २ तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ३ इतिशुद्धो
दकेनसंस्नाप्य स्थापितकलशोपरि संस्थाप्य ॐमनोजूतिर्जुषतामाज्यस्यबृहस्प
तिर्यज्ञमिमंतनोत्वरिष्टंयज्ञ ँ॰ समिमंदधातु । विश्वेदेवासऽइहमादयंतामों३प्रतिष्ठ॥१॥
एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजंतेसर्वमेव प्रतिष्ठितंभवति २ अष्टशक्तिसहितः
सत्येशः सुप्रतिष्ठितोभव ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तनारा
यणबलिकर्मांगभूतंसत्येशपूजनंकरिष्ये तद्यथा उर्व्यांक्षीरसमुद्रेऽस्मिन्व्योम्निसत्ये
चसंस्थिता । अत्रत्वंसत्ययासार्द्धंसत्येशभवसन्निधौ १ अष्टशक्तिसहितायसत्येशा
यनमःआवाहनम् १सोमसूर्याग्निसंकाशंपद्ममष्टदलान्वितम् । आसनं गृह्णसत्येशत्रैलो
क्यस्थितिकारण इतिआसनम् २ रत्नाभरणसर्वांगसर्वदेवनमस्कृत । पाद्यंगृहाणदेवे

शगंधपुष्पाक्षतैर्युतम् इतिपाद्यम् ३ सत्येशसुखभूयिष्ठसत्येशसुखदायक । सत्ये
शसत्ययायुक्तगृहाणार्घ्यंनमोस्तुते इत्यर्घ्यम् ४ गंगाजलसमानीतंसुवर्णकलशेस्थि
तम् । गृहाणाचमनंदेवत्रैलोक्यस्यापिपावनम् इत्याचमनम् ५क्षीरसागरकल्लोलैः स्नाहि
पापनिषूदन । पाहिमांभूतभव्येशशीतेनजलबिंदुना इतिस्नानम् ६हरस्वसर्वदुरितंयेना
हंवेष्टितोहरे।वस्त्रेणानेनशुभ्रेणसत्येशकुरुवांछितम् इतिवस्त्रम् ७ यज्ञेयोगेतथासांख्ये
पवित्रस्त्वंसदोच्यते।यज्ञोपवीतदानेनकुरुमांसर्वपावनम् इतियज्ञोपवीतम् ८ सुगंधंचंद
नंदिव्यंकेशरागरुसंयुतम् । विलेपनंसुरश्रेष्ठसर्वपापहरोभव इतिचंदनम् ९ सत्यनामन्न
मस्तुभ्यंमूर्तामूर्तस्वरूपिणे । वासुदेवनृसिंहाख्यकपिलादित्यभूधर॥संकर्षणमहावीरप्र
द्युम्नामितविक्रम।अनिरुद्धेशगोविंदशार्ङ्गिंश्चक्रिन्नमोस्तुते॥ वराहाच्युतयज्ञेशलक्ष्मी
कांतामृतेश्वर। पुत्रपौत्रप्रदस्त्वंचपापशत्रोनिरंजन इतिपुष्पम् १० शक्तिवृंदयुतोदेवपू

जाधूपंसुरेश्वर। गृहाणत्वंतुसत्येशसत्ययासहरक्षमाम् इतिधूपम् ११ ज्योतीरूपमरूपंत्वां
वदंतिमुनिपुंगवाः। ज्योतिर्मध्यस्थितोदेवदीपंगृह्णनमोस्तुते इतिदीपम् १२ त्रातात्वमेव
सत्येशसत्ययासहचिंत्यसे। गृहाणदेवदेवेशममनैवेद्यमुत्तमम् इतिनैवेद्यम् १३ नाराय
णनमस्तेस्तुवासुदेवनमोनमः। त्रैलोक्यजगदाधारत्राहिमामधुसूदन इतिनमस्कारः
१४ नारायणसुराधीशपुराणपुरुषोत्तम। पापोपशमनार्थाय प्रीत्यर्थंप्रतिगृह्यतामितिप्र
दक्षिणा १५ अनेकजन्मसंभूतंपापंचैवसुरेश्वर। मयादत्तार्घ्यदानेनभुक्तिमुक्तिप्रदोभव
इतिदक्षिणा १६ चंद्रादित्यौचधरणीविद्युदग्निस्तथैवच। त्वमेवसर्वज्योतींषिआर्तिक्यं
प्रतिगृह्यताम् इतिआर्तिक्यम् १७ पूगीफलंसकर्पूरंतांबूलंसुमनोहरम्। पवित्रीकरणंनि
त्यंतांबूलंप्रतिगृह्यताम् इतितांबूलम् १८ प्रभोसत्येशसद्योनेविभोविष्णोसुरेश्वर। पुत्रपौत्र
प्रदोविष्णुःपापशत्रोनिरंजन इतिनीराजनम् १९ अग्निरुद्रेशगोविंदविष्णोचक्रिन्नमोस्तु

ते ॥ पूजांगृहाणदेवेशप्रीयतांगरुडध्वज इतिप्रणामः ॥२०॥ ततःपूर्वोक्तानामष्टशक्तीनां
पूजनम् ॥ अथप्रार्थना ॥ अपराधसहस्राणिलक्षकोटियुतानिच । नश्यंतितत्क्षणात्पापं
सत्येशस्यचपूजनात् । सत्येशपंचवक्रस्त्वंलक्ष्म्यासहजगत्पतिः। वासुदेवःस्थितःपूर्वे नृ
सिंहोदक्षिणेस्थितः॥कपिलःपश्चिमास्येतु वराहश्चोत्तरेस्थितः । ऊर्ध्ववक्रेऽच्युतोज्ञेय
एतद्वैवक्रपंचकम् । सत्येशसंस्थितंराजन्पूजाकालेसदैवहि । क्षीरोदपार्थेचन्द्रस्थ
पद्मकर्णिकसंस्थितम् । पद्मकौमादकीशंखचक्राण्यस्त्राणिधारिणम् । इतिप्रार्थना । अ
थनालिकेरेणार्घ्यदानम् । यज्ञेशाच्युतदेवेशसत्यरूपसनातन । अनेनार्घ्यप्रदानेनसर्व
पापाद्विमोचय १ सत्येशायनमस्तुभ्यं पापहापरमेश्वरः । मयादत्तार्घ्यदानेनप्रे
तभुक्तिप्रदोभव २ इत्यर्घ्यंदद्यात् ॥ एतत्कृतंयत्सत्येशपूजनंतेनश्रीसत्येशः प्रीणा
तु । ततोग्निस्थापनंकुर्यात ॐ अद्यनारायणबलिहोमंकर्मणिपंचभूसंस्कारपूर्वकम

ग्निस्थापनमहंकरिष्ये तत्रकुशैर्हस्तपरिमितचतुरस्रभूमिंपरिसमुह्यतानैशान्यांनिक्षि
प्यगोमयोदकेनोपलिप्य स्फ्येनस्रुवमूलेनवाप्रादेशमात्रमुत्तरोत्तरक्रमेणप्रागग्रंत्रिरु
ल्लिख्यउल्लेखनक्रमेणानामिकांगुष्ठाभ्यांमृदंसमुद्धृत्यवारिणातंदेशमभ्युक्ष्यकास्य
पात्रस्थंवह्निंप्रत्यङ्मुखमुपसमाधाय ततोग्नेर्दक्षिणतःप्राक्संस्थमेवभूरसीत्यादिपूर्वो
क्तमंत्रैःपंचकलशान्संस्थाप्य तेषुपंचमूर्तयः कृताग्न्युत्तारणाःपंचामृतेनस्नापिताः प्र
तिष्ठाप्यावाहनंकुर्यात्।ब्रह्मारौप्यमयोदेवोविष्णुःस्वर्णमयःस्मृतः।रुद्रस्ताम्रमयोदेवो
यमोलोहमयःस्मृतः॥प्रेतस्त्रपुमयःशुभ्रोऽथवालोहमयःस्मृतः। यद्वाकुशमयाह्येतेस्था
प्याश्चैवपृथक्पृथक॥तत्रावाहनमन्त्राः ॐअग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम्॥होता
रंरत्नधातमम् । ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योति
व्याधीमहारथोजायतांदोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरंधिर्योषाजिष्णूरथेष्ठाःसभे-

योयुवास्ययजमानस्यवीरोजायतांनिकामेनिकामेनः पर्जन्योव्वर्षतु फलवत्योनऽओ
षधयः पच्यंतांयोगक्षेमोनः कल्पताम् । अस्मिन्कलशेब्रह्मन्निहागच्छेहतिष्ठब्रह्मणेनमः
ब्रह्माणंस्थापयामि ॥१॥ॐ इषेत्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्म
णऽआप्यायध्वमघ्न्याऽइंद्रायभागंप्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघश
ꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि । ॐ इदंविष्णुर्विचक्रमेत्रेधा
निदधेपदंसमूढमस्यपाꣳसुरे । अस्मिन्कलशेविष्णोइहागच्छेहतिष्ठ०॥२॥ॐअग्नऽआ
याहिवीतयेगृणानोहव्यदातये निहोतासत्सिबर्हिषि॥नमः शंभवायचमयोभवायचन
मःशंकरायचमयस्करायचनमः शिवायचशिवतरायच॥ अस्मिन्कलशेरुद्रेहागच्छेह
तिष्ठ०॥३॥ॐशंनोदेवीरभिष्टयऽआपोभवंतुपीतये।शंय्योरभिस्रवंतुनः॥यमायत्वामखा
यत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः सꣳ स्पृशस्पाहि अर्चिरसि

शोचिरसितपोसि अस्मिन्कलशेयमेहागच्छेहतिष्ठ०॥४॥ ॐ अक्रन् कर्मकर्मकृतःस
हव्वाचामयोभुवादेवेभ्यःकर्मकृत्वास्तंप्रेतसचाभुवः। प्रेताजयतानरऽइंद्रोवःशर्मयच्छतु
उग्रावः। संतुबाहवोनाधृष्यायथासथ॥अपसव्यम् अमुकगोत्रामुकप्रेतविष्णुरूपास्मि
न्कलशेइहागच्छेहतिष्ठ० ॥ ५॥ एवंपंचदेवतानांस्थापनंकृत्वा मनोजूतिर्जुषतामाज्य
स्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमंदधातुविश्वेदेवासऽइहमादयंतामों३प्रति
ष्ठेतिप्रतिष्ठाप्य ततोब्रह्मादिचतुष्टयदेवतानांसव्येन प्रेतस्यनामगोत्रोच्चारणपूर्वकमप
सव्येनावाहनादिषोडशोपचारैर्वाप्रत्येकंसंपूज्य एतत्कृतंयद्ब्रह्मादिपंचदेवतानांपूज
नंतेनब्रह्मादयःप्रीणंतु न्यूनंसंपूर्णमस्तु विष्णुंस्तुवीत जितंतेपुंडरीकाक्षनमस्तेवि
श्वभावन। नमस्तुभ्यंहृषीकेशमहापुरुषपूर्वज॥ अनादिनिधनोदेवःशंखचक्रगदाधरः।
अक्षय्यःपुण्डरीकाक्षःप्रेतमोक्षप्रदोभव॥इतिस्तुत्वा ॐ अद्यकर्तव्यनारायणबलिहोमक

र्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्प
चंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणेइतिब्रह्माणंवृणुयात् ॐ वृतोस्मीतिप्रतिवच
नम् ॐ यथाविहितंकर्मकुर्विंतियजमानेनोक्ते ॐ करवाणीतितेनोक्ते अग्नेर्दक्षिणतःशु
द्धमासनंनिधायतदुपरिप्रागग्रान्कुशानास्तीर्य अग्नेःप्रदक्षिणंकारयित्वाब्रह्माणमुदङ्
मुखंतत्रोपवेश्यास्मिन्नारायणबलिकर्मणित्वंमेब्रह्माभवइत्यभिधाय ॐ भवानीतिते
नोक्तेप्रणीतार्थंप्रागग्रैःकुशैरग्नेरुत्तरतआसनद्वयंकल्पयित्वा प्रणीतापात्रंपुरतः कृत्वा
वारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्यपश्चिमासनेनिधायालभ्य पूर्वासने
स्थापयित्वा ततःपरिस्तरणम् बर्हिषश्चतुर्थभागमादायाग्नेरीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋ
त्याद्वायव्यांतमग्नितः प्रणीतापर्यंतम्। ततोग्नेरुत्तरतः पश्चिमदिशिपवित्रच्छेदनार्थंकुश
त्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली चरुस्थाली

संमार्जनकुशाउपयमनकुशाः प्रादेशमितपालाशसमिधस्तिस्रः स्रुवःअत्रदाल्भ्येना
ज्यहोमेचतुर्गृहीतहोमोक्तत्वात तथाचरुहोममपिचतुर्गृहीतेनैवोक्तत्वात्तद्धोमार्थंबाहु
मात्रास्रुक्आज्यं षट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नामतंडुलपूर्णपात्रंचर्वं
र्थास्तंडुलाः एतानिपवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि ततःपवित्र
च्छेदनकुशैःयजमानप्रादेशमितपवित्रच्छेदनं सपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपा
त्रेनिधायद्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वात्रिरुत्पवनंततः प्रोक्षणीपात्रं
सव्यहस्तेनगृहीत्वादक्षिणाऽनामिकांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुद्दिंगनम्। ततःप्रणीतो
दकेनप्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तुसेचनम् । आज्यस्थाल्यादी
निपूर्णपात्रपर्यंतानि अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात । ततआज्यस्थाल्या
माज्यंनिरूप्यप्रणीतोदकेनतंडुलान्प्रक्षाल्यचरौप्रणीतोदकंदत्त्वा तत्रतंडुलान्प्रक्षि
प्यस्वयंचरुंगृहीत्वाब्रह्माचाज्यवह्न्युत्तरतश्चरुंदक्षिणतआज्यंनिदध्यात् । ततःसि

इंचरौतृणादिप्रज्वाल्यउभयोपरिप्रदक्षिणंभ्रामयित्वावह्नौतत्प्रक्षेपः । ततस्त्रिः स्रु
वप्रतपनम् । संमार्जनकुशानामग्रैरंतरतोमूलैर्बाह्यतःस्रुवंसंमृज्यप्रणीतोदकेनाभ्युक्ष्य
पुनस्त्रिः प्रतप्यदक्षिणतोनिदध्यात् । एवंस्रुक्स्रुवसमेक्षणयोरपिप्रतपनसंमार्जनेकृत्वा स्रु
वादुत्तरतःस्थापयेत् । ततआज्यमग्नितश्चरोः पूर्वेणानीयाग्रेधृत्वा आज्यात्पश्चिमेन
चरुमानीयाज्यस्योत्तरतोनिदध्यात्।ततआज्यस्यप्रोक्षणीवत्त्रिरुत्पवनम् अवेक्ष्यसत्य
पद्रव्येतन्निरसनम् ततः प्रोक्षण्युत्पवनम् ततउत्थायउपयमनकुशान्वामहस्तेकृत्वाप्र
जापतिंमनसाध्यात्वा तूष्णीमग्नौघृताक्तमूलाःसमिधःप्रक्षिपेत् । ततउपविश्यसपवि
त्रप्रोक्षण्युदकेनप्रदक्षिणकरेणाग्निंपर्युक्ष्य प्रणीतापात्रेनिधायब्रह्मणान्वारब्धः पातित
दक्षिणजानुःसमिद्धतमेऽग्नौजुहुयात् । तत्रप्रथमाहुतिचतुष्टयेतत्तदाहुत्यनंतरंस्रुवाव
स्थितहुतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः । प्रजापतयेस्वाहा उत्तरपूर्वार्द्धेइदंप्रजापतये० ।

इतित्यागंविधाय मनस्येवप्रजापतिहोमः सर्वत्र। ॐ इन्द्रायस्वाहा इदमिंद्राय०दक्षि
णपूर्वार्द्धे इत्याघारौ । ॐ अग्नयेस्वाहाउत्तरतः इदमग्नये० । ॐ सोमायस्वाहाअग्नेर्द
क्षिणप्रदेशेइदंसोमायेतित्यागःइत्याज्यभागौ । अथप्रधानहोमः ५११४०युंजतेनुवा
केनचतुर्गृहीताज्येनस्रुचाजुहुयात् ॐ युंजतेमनऽउतयुंजतेधियोविप्राविप्रस्यबृहतो
विपश्चितः । विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुः परिष्टुतिःस्वाहा १ इदंवि
ष्णवे० इतित्यागस्सर्वत्रोत्तरमंत्रेषुचॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्य
पाꣳसुरेस्वाहा २ ॐ इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या। व्यस्कभ्नारो
दसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैःस्वाहा ३ ॐ देवश्रुतौदेवेष्वाघोषतंप्राची
प्रेतमध्वरंकल्पयंती ऊर्ध्वंयज्ञंनयतंमाजिह्वरतंस्वंगोष्ठमावदतन्देवीदुर्गेऽआयुर्मानिर्वा
दिष्टप्रजांमानिर्वादिष्टमत्ररमेथांवर्ष्मन् पृथिव्याः स्वाहा ४ ॐ विष्णोर्नुकंवीर्याणिप्र

वोचंयः पार्थिवानिविममेरजा ꣳसि। योऽअस्कभायदुत्तर ꣳ सधस्थंविचक्रमाणस्त्रेधोरु
गायोविष्णवेत्वास्वाहा ५ ॐदिवोवाविष्णऽउतवापृथिव्यामहोवाविष्णऽउरोरंतरिक्षात
उभाहिहस्तावसुनापृणस्वाप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वास्वाहा ६ ॐ प्रतद्वि
ष्णुस्तवतेवीर्येणमृगोनभीमः कुचरोगिरिष्ठाः यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुव
नानिविश्वास्वाहा ७ ॐविष्णोररराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवो
सि वैष्णवमसिविष्णवेत्वास्वाहा ८ अथस्रुवेणाज्याहुतयः ॐलोमभ्यः स्वाहा २ ॥ १ ॥ ॐ
त्वग्भ्यःस्वाहा २ ॥ २ ॥ ॐ लोहितायस्वाहा २ ॥ ३ ॥ ॐ मेदोभ्यःस्वाहा २ ॥ ४ ॥ ॐ
मा ꣳसेभ्यःस्वाहा २ ॥ ५ ॥ ॐ स्नावभ्यःस्वाहा २ ॥ ६ ॥ ॐ अस्थिभ्यःस्वाहा २ ॥ ७ ॥ ॐ
मज्जाभ्यःस्वाहा २ ॥ ८ ॥ प्रत्येकंयथामंत्रत्यागः इतिषोडशाज्याहुतयः ॥ ॐ रेतसे
स्वाहा १ ॥ १ ॥ ॐ पायवेस्वाहा १ ॥ २ ॥ ॐ आयासायस्वाहा १ ॥

य०ना० ॥ ३ ॥ ॐ प्रयासायस्वाहा १ ॥ ४ ॥ ॐ संयासायस्वाहा १ ॥ ५ ॥ ॐ बलिः
॥१६॥ वियासायस्वाहा १ ॥ ६ ॥ ॐ उद्यासायस्वाहा १ ॥ ७ ॥ ॐ शुचेस्वाहा
१ ॥ ८ ॥ ॐ शोचतेस्वाहा १ ॥ ९ ॥ ॐ शोचमानायस्वाहा १ ॥ १० ॥ ॐ शोकाय
स्वाहा १ ॥ ११ ॥ ॐ तपसेस्वाहा १ ॥ १२ ॥ ॐ तप्यतेस्वाहा १ ॥ १३ ॥ ॐ
तप्यमानायस्वाहा १ ॥ १४ ॥ ॐ तप्तायस्वाहा १ ॥ १५ ॥ ॐ घर्मायस्वाहा १ ॥ १६ ॥
ॐ निष्कृत्यैस्वाहा १ ॥ १७ ॥ ॐ प्रायश्चित्त्यैस्वाहा १ ॥ १८ ॥ ॐ भेषजायस्वाहा १ ॥
१९ ॥ ॐ यमायस्वाहा १ ॥ २० ॥ ॐ अंतकायस्वाहा १ ॥ २१ ॥ ॐ मृत्यवेस्वाहा १ ॥
२२ ॥ ॐ ब्रह्मणेस्वाहा १ ॥ २३ ॥ ॐ ब्रह्महत्यायैस्वाहा १ ॥ २४ ॥ ॐ विश्वेभ्योदेवेभ्यः ॥
स्वाहा १ ॥ २५ ॥ ॐ द्यावापृथिवीभ्याᳬस्वाहा १ ॥ २६ ॥ इतिमंत्रैराज्यंहुत्वायथामंत्रत्या ॥१६॥
गः ॥ ततःपुरुषसूक्तेनषोडशाज्याहुतीर्हुत्वा तद्यथाॐसहस्रशीर्षा० गुलᳬस्वाहा । इदं

विष्णवेनममइतित्यागः सर्वत्र १। ॐ पुरुषऽएवेद ँ० तिस्वाहा २ॐएतावा० दिविस्वा
हा ३ ॐ त्रिपादूर्ध्व० अभिस्वाहा४ॐततोविरा० पुरःस्वाहा ५ ॐ तस्माद्यज्ञात्सर्व
हुतःसंभृतं० येस्वाहा ६ ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः० तस्वाहा ७ ॐ तस्मादश्वा०
यःस्वाहा ८ ॐ तंयज्ञं० येस्वाहा ९ ॐ यत्पुरुषं० च्येतेस्वाहा १० ॐ ब्राह्मणोस्य०
यतस्वाहा ११ ॐ चन्द्रमा० तस्वाहा १२ ॐ नाभ्याऽआसीदं० यन्स्वाहा १३ ॐ
यत्पुरुषेण० हविःस्वाहा १४ॐसप्तास्यासन्०पशुँःस्वाहा १५ ॐ यज्ञेनयज्ञ० देवा
स्वाहा १६ ततोऽवदानधर्मेणचतुर्गृहीतेनचर्वाहुतीर्जुहुयात्। तद्यथा स्रुच्युपस्तीर्यम
ध्यात्पूर्वार्धाञ्चचरुमवदायाभिघायजुहुयात्। तत्रमंत्राः ॐ इदंविष्णु० रेस्वाहा १
इदंविष्णवे०इतित्यागःसर्वत्र ॐ अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः।
याभिर्मित्रावरुणावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीःस्वाहा २ ॐ प्रपर्वतस्यवृ

षभस्यपृष्ठान्नावश्चरंतिस्वसिचऽइयानाः। ताऽआवदृत्रन्नधराग्रुदक्ताऽअहिर्बुध्न्यमनुरीय
माणाः। विष्णोर्विक्रमणमसिविष्णोर्विक्रांतमसिविष्णोः क्रांतमसिस्वाहा ३ विष्णोर्नु
कंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजाꣳसि। योऽअस्कभायदुत्तरꣳसधस्थंविचक्र
माणस्त्रेधोरुगायोविष्णवेत्वास्वाहा ४ॐ दिवोवाविष्णऽउतवापृथिव्यामहोवाविष्णऽउ
रोरंतरिक्षात्। उभाहिहस्तावसुनापृणस्वप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वास्वाहा
५ ॐ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः। यस्योरुषुत्रिषुविक्रमणेष्व
धिक्षियंतिभुवनानिविश्वास्वाहा ६ ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यू
रसिविष्णोर्ध्रुवोसि वैष्णवमसिविष्णवेत्वास्वाहा७ॐ तद्विप्रासोविपन्यवोजागृवांꣳसः
समिंधते। विष्णोर्यत्परमंपदꣳस्वाहा८ॐ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे।
इन्द्रस्ययुज्यःसखास्वाहा ९ ॐ तद्विष्णोःपरमंपदꣳसदापश्यन्तिसूरयः। दिवीवचक्षु

राततः स्वाहा १० ॐ अद्भ्यः संभृतः पृथिव्यैरसाच्चविश्वकर्मणः समवर्त्तताग्रे । तस्य त्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रेस्वाहा ११ ॐ वेदाहमेतंपुरुषंमहां तमादित्यवर्णंतमसः परस्तात् । तमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेयनाय स्वाहा १२ ॐ प्रजापतिश्चरतिगर्भेऽअंतरजायमानोबहुधाविजायते । तस्ययोनिंप रिपश्यंतिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वास्वाहा १३ ॐ योदेवेभ्यऽआतपतियो देवानांपुरोहितः । पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मयेस्वाहा १४ रुचंब्राह्मंजन यंतोदेवाऽअग्रेतदब्रुवन् । यस्त्वैवंब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशेस्वाहा १५ ॐ श्री श्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुंमऽइ षाणसर्वलोकंमऽइषाणस्वाहा १६ इतिषोडशचर्वाहुतयः ॥ ततोघृताक्ततिलवशर्करा मिश्रितैर्जुहुयात् । तद्विप्रासोथमंत्रेणयावदष्टोत्तरंशतम् । ततः स्विष्टकृतंदद्याच्चरुशेषेणमं

त्रवित्। तद्यथा ॐ तद्विप्रासो०इदंविष्णवेइतित्यागः। ततोब्राह्मणान्वारब्धकर्तृकोहोम
स्तत्रतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेषद्रव्यस्यप्रोक्षणीपात्रेप्रक्षेपः होमांतेस्थापि
तदेवतानांपूजनम् ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तनारायणबलि
कर्मणिब्रह्मादिस्थापितदेवतानापुनःपूजनमहंकरिष्ये ब्रह्मादिचतुष्टयदेवताभ्यः स
त्येशसहिताभ्यएषवोगंधः एवंपुष्पादीनिसमर्प्यततोपसव्येनामुकगोत्रामुकप्रेतएष
ते गंधउपतिष्ठतु एवंपंचोपचारान्कृत्वापुनः पूजनंसंपूर्णमस्तुतत्रैवाज्यस्थालीपाका
भ्यांस्विष्टकृत् स्रुच्युपस्तीर्य चरोरुत्तरार्द्धान्मेक्षणेनसकृदवदाय द्विरभिघार्य ॐ अग्न
येस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते०ततआज्येनॐभूःस्वाहाइदमग्नये० १ ॐ भुवः
स्वाहाइदंवायवे०२ॐ स्वःस्वाहाइदंसूर्याय० ३ ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्दे
वस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमः। शोशुचानोविश्वाद्वेषा ँसिप्रमुमुग्ध्यस्म

त्स्वाहा इदमग्नीवरुणाभ्यां० ४ ॐ सत्त्वन्नोऽअग्नेव्वमोभवोतीनेदिष्ठोऽअस्याऽउष
सोव्युष्टौ। अवयक्ष्वनोव्वरुण ँ रराणोव्वीहिमृडीकं ँ सुहवोनऽएधिस्वाहा ॥ इदमग्नीवरु
णाभ्यां० ५ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाऽअसि। अयानोयज्ञंवहा
स्ययानोधेहिभेषज ँ स्वाहा इदमग्नयेअयसे० ६ येतेशतंवरुणयेसहस्रंयज्ञियाःपाशा
व्वितताममहांतः। तेभिर्न्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा। इदंवरु
णायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० ७ ॐ उदुत्तमंवरुणपाशम
स्मदवाधमंविमध्यम ँ श्रथाय। अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्याम
स्वाहा। इदंवरुणाय० ८ इतिसर्वप्रायश्चित्तम्। ॐ प्रजापतयेस्वाहा इदंप्रजापतये० इति
मनसाप्राजापत्यम् ९ इतिनवाहुतीर्हुत्वा अथपूर्णाहुतिः द्वादशगृहीतेनाज्येनस्रुचंपूरयि
त्वा तदुपरिगंधकुंकुमाक्षततांबूलकुसुमयुतंनालिकेरफलंनिधायोत्थाप्य स्रुचंहस्तेगृही

य०ना० त्वा ॐमूर्धानंदिवोऽअरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निम् कविᳪंसम्राजमतिथिं बलिः
॥१९॥ जनानामासन्नापात्रंजनयंतदेवाः १। ॐस्वाहाप्राणेभ्यःसाधिपतिकेभ्यः पृथिव्यैस्वाहाऽ
ग्नयेस्वाहांतरिक्षायस्वाहावायवेस्वाहादिवेस्वाहासूर्यायस्वाहा दिग्भ्यःस्वाहा चंद्राय
स्वाहानक्षत्रेभ्यःस्वाहाऽद्भ्यःस्वाहावरुणायस्वाहानाभ्यैस्वाहापूतायस्वाहा वाचे
स्वाहाप्राणायस्वाहा प्राणायस्वाहाचक्षुषेस्वाहाचक्षुषेस्वाहाश्रोत्रायस्वाहा श्रोत्राय
स्वाहा इदंवैश्वानरायाग्नये० इतिपूर्णाहुतिः ॥ अथसंस्रवप्राशनम् । तत्र आचम्य
ॐ अद्यकृतैतन्नारायणबलिहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्ण
पात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेवादक्षिणांतुभ्यमहंसंप्रददे
इतिदक्षिणांदद्यात ॐस्वस्तीतिप्रतिवचनम् । ततःप्रणीताविमोकः ॐसुमित्रियानऽआप ॥१९॥
ओषधयःसंतु इतिपवित्राभ्यांप्रणीताजलमानीयतेनशिरः संमृज्य ॐ दुर्मित्रिया

स्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्म इत्यैशान्यांप्रणीतान्युब्जीकरणम् ॐ देवागातु
विदोगातुंवित्वागातुमितमनसस्पतऽइमंदेवयज्ञ॑स्वाहाव्वातेधाः स्वाहा इतिमंत्रेणब
र्हिर्होमः। मेक्षणमपिअग्नौक्षिपेत् पवित्रेअग्नौक्षिपेदितिहरिहरभाष्ये मणीरामदीक्षितकृता
नूपविलासेच। रामदत्तमिश्रस्यनाभिमतम् । ततःस्रुवेणभस्मानीयदक्षिणानामिकागृ
हीतभस्मना ॐ त्र्यायुषंजमदग्नेरितिललाटे ॐ कश्यपस्यत्र्यायुषमितिग्रीवायाम् ॐ
यद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूले ॐ तन्नोअस्तुत्र्यायुषमितिहृदि त्र्यायुषंकुर्यात् ॐ अ
द्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिहवनकर्मणः प्रतिष्ठा
र्थंयथासंपन्नेनान्नेनतृप्तिपर्यंतेनयथासंख्याकान्ब्राह्मणान्भोजयिष्ये तेनश्रीविष्णुःप्रीय
ताम् । नारायणबलिहवनकर्मणिन्यूनातिरिक्तंविष्णुप्रसादात्सर्वंपरिपूर्णमस्तु । आ
चम्यप्राणानायम्य ॐ तत्सदित्याद्युच्चार्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमि

तकनारायणबलिपूर्वांगभूतं परलोकेमहातृषानिवारणार्थंवैष्णवैःसूक्तैराद्यंतयोः पुरा
णश्लोकत्रयावृत्त्याविष्णुतर्पणमहंकरिष्ये जलतिलदुग्धयवसर्वौषधीतुलसीदलमिश्रो
दकेनशंखेनतर्पणंकुर्यात् सव्येनैव ।ॐअनादिनिधनोदेवःशंखचक्रगदाधरः। अव्ययः
पुंडरीकाक्षःप्रेतमोक्षप्रदोभव १ अतसीपुष्पसंकाशंपीतवाससमच्युतम्। येनमस्यंति
गोविंदंनतेषांविद्यतेभयम् २ कृष्णकृष्णकृपालोत्वमगतीनांगतिर्भव। संसारार्णवमग्ना
नां प्रसीदपुरुषोत्तम ३ नारायणसुरश्रेष्ठलक्ष्मीकांतजनार्दन।अनेनतर्पणेनाथप्रेतमोक्ष
प्रदोभव ४ ॐ सहस्रशीर्षा० गुलम् १ पुरुषएवेद २० इति २ एतावानस्य० दिवि ३
त्रिपादूर्ध्वऽ० अभि ४ ततोविराडजायत० पुरः ५ तस्माद्यज्ञात्सर्वहुतः संभृत०
श्चये ६ तस्माद्यज्ञात्सर्वहुतऽऋचः ० यत ७ तस्मादश्वाऽअ० वयः ८ तंयज्ञं०
श्चये ९ यत्पुरुषं० उच्येते १० ब्राह्मणोऽस्य० यत ११ चंद्रमा० यत १२

नाभ्याऽआसीदं॰ यन् १३ यत्पुरुषेण॰ ह्वविः १४ सप्तास्यासन्प॰ पशुम् १५
यज्ञेनयज्ञ॰ देवाः १६ अनादिनिधनोदेव॰ श्लो॰४ ॐ अद्भ्यः संभृतः॰मग्रे १ वेदाह
मेतं॰ नाय २ प्रजापतिश्चरति॰ विश्वा ३ योदेवेभ्यऽआ॰ हाये ४ रुचंब्राह्मंजनयंतो॰
न्वशे ५ श्रीश्चतेलक्ष्मीश्च॰ षाण ६ अनादिश्लो॰ ४।४।५। १४ ॐयुंजतेमनऽउतयुं
जतेधियोव्विप्राव्विप्रस्यबृहतोविपश्चितः । व्विहोत्रादधेवयुनाव्विदेकऽइन्महीदेवस्य
सवितुःपरिष्टुतिःस्वाहा १ इदंविष्णुर्विं॰ सुरेस्वाहा २ इरावतीधेनुमतीहिभूत॑ सू
यवसिनीमनवेदशस्य । व्यस्कभ्नारोदसीव्विष्णवेतेदाधर्थपृथिवीमभितोमयूखैः स्वा
हा ३ देवश्रुतौदेवेष्वाघोषतम्प्राचीप्रेतमध्वरंकल्पयंतीऽऊर्ध्वंयज्ञंनयतं माजिव्हरतं
स्वङ्गोष्ठमावदनदेवीदुर्य्येऽआयुर्मानिर्वादिष्टं प्रजांमानिर्वादिष्टमत्ररमेथांव्वर्ष्मन्पृथि
व्याः॰ ४ विष्णोर्नुकंवीर्याणिप्रवोचंयः पार्थिवानिविममेरजांसि । योऽअस्कभायद्

त्तर ँ॒सधस्थंविचक्रमाणस्त्रेधोरुगायोव्विष्णवेत्वा॰ ५ दिवोवाविष्णऽउतवापृथिव्या
महोवाव्विष्णऽउरोरंतरिक्षात्। उभाहिहस्ताव्वसुनापृणस्वाप्रयच्छदक्षिणादोतसव्या
द्विष्णवेत्वा॰६प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमः कुचरोगिरिष्ठाः। यस्योरुषुत्रिषुव्वि
क्रमणेष्वधिक्षियंतिभुवनानिव्विश्वा॰ ७ विष्णोररराटमसिव्विष्णोःश्नप्त्रेस्थोविष्णोः
स्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वा॰८अनादिनिधनःश्लो॰ ॥ ४ ॥ ११ ॥५॥
ॐ युजेवांब्रह्मपूर्व्यन्नमोभिर्व्विश्लोकऽएतुपथ्येवसूरेः। शृण्वंतुव्विश्वेऽअमृतस्यपुत्राऽ
आयेधामानिदिव्यानितस्थुः॰ १ यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहिमानमोज
सा। यः पार्थिवानिविममेसऽएतशोरजा ँ॒सिदेवःसवितामहित्वना॰ २देवसवितःप्रसुव
यज्ञम्प्रसुवयज्ञपतिम्भगाय दिव्योगंधर्वः केतपूः केतन्नः पुनातुव्वाचस्पतिर्वाचन्नःस्वद
तु॰ ३ इमंनोदेवसवितर्यज्ञम्प्रणयदेवाव्य ँ॒ सखिविद ँ॒ सत्राजितन्धनजित ँ॒स्वर्जिं

तम् । ऋचास्तोमᳪसमर्द्धयगायत्रेणरथन्तरम्बृहद्गायत्रवर्तनिस्वाहा ४ देवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् । आददेगायत्रेणछन्दसांगिरस्वत्पृथिव्याः
सधस्थादग्निम्पुरीष्यमंगिरस्वदाभरत्रैष्टुभेनच्छंदसांगिरस्वत्० ५ अभ्रिरसिनार्य
सित्वयाव्वयमग्निᳪशकेमखनितुᳪ सधस्थ। आजागतेनच्छंदसांगिरस्वत्० ६ हस्तऽ
आधायसवितािबिभ्रदभ्रिᳪ हिरण्ययीम् । अग्नेर्ज्योतिर्निचाय्यपृथिव्याऽअध्याभर
दानुष्टुभेनच्छंदसांगिरस्वत्० ७६४ ॐ विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे। इंद्र
स्ययुज्यःसखा० १ तद्विष्णोःपरमंपदᳪ सदापश्यंतिसूरयः । दिवीवचक्षुराततं० २
अनादिनिधनः श्लो० ४६२३ रक्षोहणंव्वलगहनंवैष्णवीमिदमहन्तंव्वलगमुत्किरा
मियम्मेनिष्ट्योयममात्योनिचखानेदमहन्तं वलगमुत्किरामियम्मेसमानोयमस
मानोनिचखानेदमहंतंवलगमुत्किरामि यम्मेसबंधुर्यमसबंधुर्निचखानेदमहन्तंव्वल

य०ना० गमुत्किरामि यम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि १ स्वराडसिसपत्न बलिः
॥२२॥ हासत्त्रराडस्यभिमातिहाजनराडसि रक्षोहासर्वराडस्यमित्रहा २। २। २५ दिविवि
ष्णुर्व्यक्रꣳस्तजागतेनच्छंदसा ततोनिर्भक्तोयोऽस्मान्द्वेष्टियञ्चव्वयंद्विष्मोन्तरिक्षेवि
ष्णुर्व्यक्रꣳस्तत्रैष्टुभेनच्छन्दसा ततोनिर्भक्तोयोऽस्मान्द्वेष्टियंचवयंद्विष्मः पृथिव्यां
विष्णुर्व्यक्रꣳस्तगायत्रेण छंदसा ततोनिर्भक्तोयोऽस्मान्द्वेष्टियञ्चव्वयंद्विष्मोऽस्मा
दन्नादस्यैप्प्रतिष्ठायाऽअगन्मस्वःसंज्योतिषाभूम १। १७। ४६ ॐ प्रेताजयतानरऽ
इन्द्रोवःशर्मयच्छतु। उग्रावःसंतुबाहवोनाधृष्यायथासथ १।२४। १ ॐ अश्वस्तू
परोगोमृगस्तेप्प्राजापत्याः कृष्णग्रीवऽआग्नेयोरराटेपुरस्तात्सारस्वतीमेष्यधस्ता
द्धन्वोरश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामोनाभ्याꣳसौर्य्यायामौ श्वेतश्चकृ ॥२२॥
ष्णश्चपार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौसक्थ्योर्वायव्यः श्वेतः पुच्छऽइन्द्रायस्वपस्यायवे

हद्वैष्णवोवामनः १ । १२ । २ ॐ विष्णोःक्रमोसिसपत्नहागायत्रंछन्दऽआरो
हपृथिवीमनुव्विक्रमस्वविष्णोः क्रमोस्यभिमातिहात्रैष्टुभञ्छन्दऽआरोहांतरिक्षमनुव्वि
क्रमस्वव्विष्णोः क्रमोस्यरातीयतोहन्ताजागतञ्छन्दऽआरोहदिवमनुविक्रमस्ववि
ष्णोः क्रमोसिशत्रूयतोहन्तानुष्टुभञ्छन्दऽआरोहदिशोनुविक्रमस्व १ । १४ ॐ
साविश्वायुःसाव्विश्वकर्मासाव्विश्वधायाः इन्द्रस्यत्वाभाग ँ सोमेनातनच्मिव्विष्णो
हव्य ँ रक्ष १ । १५ ॐ अन्हुतमसि हविर्धानंद्द ँ हस्वमाह्वार्मातेयज्ञ
पतिर्ह्वाषात् । विष्णुस्त्वाक्रमताशुरुव्वातायापहत ँ रक्षोयच्छन्तापंच १ । १६ । ५१
ॐ मीढुष्टमशिवतमशिवोनःसुमनाभव । परमेवृक्षऽआयुधंनिधायकृत्तिंव्वसान
ऽआचरपिनाकंबिभ्रदागहि १ । ३४ । ३४ ॥ ॐ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदा
भ्यः । अतोधर्माणिधारयन् १ ॐ तद्विप्रासोविपन्यवोजागृवा ँ सःसमिंधते । विष्णो

यत्परमंपदम् २।७।३४ॐ विश्वेदेवासऽआगतश्शृणुतामऽइम ँ हवम् । एदंबर्हिर्निषीदत १।८। १ ॐ उपयामगृहीतोस्यादित्येभ्यस्त्वाविष्णऽउरुगायैषतेसोमस्त ँ रक्षस्वमात्वादभन् १।५। ३८ ॐ उरुंविष्णुविक्रमस्वोरुक्षयायनस्कृधि । घृतंघृतयोनेपिबप्रप्रयज्ञपतिन्तिरस्वाहा १।१ अनादिनिधनोदेवश्लो० ४ एतत्कृतंयद्विष्णुतर्पणंतेनश्रीमहाविष्णुःप्रीतोऽस्तु । अपसव्यम् । ॐ अद्यामुकगोत्रामुकप्रेतपरलोकेमहातृषानिवृत्त्यर्थमिदमुदकमुपतिष्ठतु । इतिताम्रपात्रगृहीतसर्वौषधीयवतिलतुलसीदलयुतजलेनसव्यहस्तगृहीतेनदक्षिणहस्तस्थशंखेन उभाभ्यांहस्ताभ्यांजलधारां दद्यात् । एवंत्रिवारम् । ॐ अद्येतिपूर्ववत् । ततःसव्यंकृत्वाआचम्य ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यपरलोकेमहाक्षुधानिवारणार्थंविष्णुतर्पणकर्मणः सांगतासिद्ध्यर्थं श्रीमहाविष्णुप्रीत्यर्थं यथासंपन्नेनान्नेनतृप्तिपर्यंतेनयथासंख्याकान्ब्राह्मणानेकं

वाभोजयिष्ये तेनश्रीविष्णुःप्रीयताम् । विष्णुतर्पणकर्मणिन्यूनातिरिक्तंसर्वंपरिपूर्ण मस्तु । इतिविष्णुतर्पणम् ॥ अथैकादशश्राद्धप्रयोगः ॥ कृतनित्यक्रियः आचांतउप विष्टः पूर्वोपकल्पितंप्रज्वालितप्रदीपंस्थापितगौरसर्षपतिलादिरक्षोघ्नंश्राद्धदेशमा गत्य ॐ सिद्धमितिपाचिकांपृष्ट्वाकुशत्रयजलेन ॐ अपवित्रःपवित्रोवेतिपठित्वा ॐ पुण्डरीकाक्षःपुनात्वित्युच्चार्य श्राद्धीयवस्तून्यात्मानंचसिंचेत् । ॐ अद्यामुक गोत्रस्यपितुरमुकप्रेतस्यप्रेतत्वविमुक्त्यर्थम् अमुकदुर्मरणनिमित्तकनारायणबलौवि हितविष्णवादिविष्णुपर्यंतानामेकादशश्राद्धानिपिंडदानविधिनाकरिष्ये । ततस्त्रिर्गा यत्रींजपित्वा ॐ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वाहायैस्वधायै नित्यमेवनमोनमः ॥इतित्रिर्जपेत् । ततःपिंडस्थानंनिर्माय चतुरस्राः प्रादेशमात्रा एकादशवेदिकाःकुर्यात् । तन्मध्येवामहस्तेदक्षिणहस्तगृहीतदर्भपिंजूलीमूलेनप्रादेश

मात्रमपहतेत्यादिनोल्लिख्यदर्भपिंजूलीमुत्तरतस्त्यजेत् एवंनवरेखाः। अपसव्येनदश मरेखांकृत्वा पुनःसव्येनएकादशीं रेखांकुर्यात्। ततःरेखोपरि ॐ येरूपाणिप्रतिमुं चमानाऽअसुराःसंतःस्वधयाचरंति। परापुरोनिपुरोयेभरंत्यग्निष्टांल्लोकान्प्रणुदात्त्य स्मात॥ इतिमंत्रेणांगारंभ्रामयित्वाअंगारंदाक्षिणतस्त्यजेत्। ततोरेखोपरिकुशत्रयंद क्षिणाग्रंप्रत्येकमास्तीर्य ॐ देवताभ्यइतित्रिर्जपेत। ततएकादशपुटकेजलयवगंध पुष्पाणिकृत्वा तत्रदशमपुटकेयवस्थानेतिलप्रक्षेपः। दक्षिणहस्तेन यवकुशत्रयजला न्यादाय वामहस्तेपुटकमेकंचगृहीत्वा ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यामुकदुर्मर णनिमित्तकनारायणबलिविहितैकादशश्राद्धेविष्णोऽत्रावनेनिक्ष्वते नमः १ इतिपुट कस्थजलादर्धजलंप्रथमवेदिकाकुशोपरिअवनेजनंदत्त्वा एवंद्वितीयवेदिकायांचतत्र शिव अत्राऽवनेनिक्ष्वतेनमः २ यमसपरिवार ३ सोमराज ४ हव्यवाहन ५ सोमापि

तृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९। अपसव्यम्। अद्यामुकगोत्रामुकप्रेतनारायणब
लिविहितैकादशश्राद्धपिंडस्थानेअत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठताम्। इतिदश
मवेदिकायामवनेजनंकुशोपरिदत्त्वा पुनःसव्येन ॐ अद्यविष्णोअत्रावनेनिक्ष्वते
नमः एवमेकादशस्थानेष्ववनेजनंदत्त्वा ततस्तिलघृतमधुयुतेनान्नेनपिंडान्कृत्वा
घृतमधुभ्यामभिघार्य एकंपिंडंवामहस्तेकृत्वादक्षिणहस्तेनकुशयवजलान्यादाय
ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यनारायणबलिविहितैकादशश्राद्धे विष्णोएषतेपिंडो
नमइतिवामान्वारब्धदक्षिणहस्तेनावनेजनस्थानेपिंडंदद्यात्। एवं शिव २ यमसप
रिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९।
अपसव्यम्। ॐ अद्यामुकगोत्रामुकप्रेतनारायणबलिविहितैकादशश्राद्धेएषपिंडस्ते
मयादीयतेतवोपतिष्ठताम्। इतिद्वशमंपिंडंदत्त्वा ततःसव्येनविष्णो० नमः११ एवंसर्वे

षांपिंडानूदत्त्वा ततोदर्भमूलेकरंप्रोञ्छ्यआचम्यहरिंस्मृत्वा ततोऽवनेजनपात्रंदत्त्वाव
शिष्टजलयुतंवामहस्तेकृत्वादक्षिणहस्तेन कुशत्रययवजलान्यादाय ॐ अद्यामुक
गोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिविहितैकादशश्राद्धे विष्णोप्र
त्यवनेनिक्ष्वतेनमः एवंद्वितीयादिवेदिकायांचतत्र शिव प्रत्यवनेनिक्ष्वतेनमः २ यमस
परिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७ मृत्यो ८ पुरुष ९।
अपसव्यम् । ॐअद्यामुकगोत्रामुकप्रेतनारायणबलिविहितैकादशश्राद्धपिंडे प्रत्य
वनेनिक्ष्वते मयादीयतेतवोपतिष्ठताम् । इतिदशमपिंडोपरिप्रत्यवनेजनंदद्यात । पुनः
सव्येन अद्या०श्राद्धे विष्णोप्रत्यवनेनिक्ष्वतेनमः एवंप्रत्यवनेजनंदद्यात् । ततोनीवींवि
स्रस्याचम्य वामेनपाणिनाधृतंसूत्रंदक्षिणेनादाय उभाभ्यां पिंडोपरिॐएतत्तेविष्णो
वासइतिसूत्रंधृत्वा एवंशिवादीनामपि । दशममपसव्येन एतत्तेपितर्वास इतिसूत्रं

धृत्वा पुनरेकादशेऽपसव्येनएतत्तेविष्णोवासः कुशादीन्यादाय । ॐ अद्यामुकगोत्रस्य
अमुकप्रेतस्यनारायणबलिविहितैकादशश्राद्धपिंडे विष्णोएतद्वासस्तेनमः । एवं
शिव २ यमसपरिवार ३ सोमराज ४ हव्यवाहन ५ सोमपितृमन् ६ रुद्ररूप ७
मृत्यो ८ पुरुष ९ । अपसव्यम् । ॐ अद्यामुकगोत्रामुकप्रेतनारायणब
लिविहितैकादशश्राद्धपिंडे एतद्वासस्तेमयादीयतेतवोपतिष्ठतामितिसूत्रमुत्सृजेत् ।
ततःसव्येनैकादशेविष्णुपिंडेच पूर्ववत्सूत्रमुत्सृजेत । ततस्तूष्णीं गंधपुष्पधूपदीप
तांबूलपूगीफलानिदद्यात । ततःपिंडशेषान्नंपिंडसमीपेविकीर्य ततःएभिःपिंडदानैः
अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिरस्तु उत्तमलोकावाप्तिरस्तु । ततोंजलिदा
नम् । ॐअद्यामुकगोत्रस्यामुकप्रेतस्यपरलोके महातृषानिवारणार्थम् अमुकदुर्मरण
निमित्तकनारायणबलिविहितैकादशश्राद्धेपिण्डोपरि एकैकमंत्रेणद्विद्विरंजलिदानम

हंकरिष्ये ॐ आपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीरायस्वाश्चितानाः । याभिर्मित्रावरु
णावभ्यषिंचन्याभिरिंद्रमनयन्नत्यरातीः । अद्यामुकगोत्रस्यामुकप्रेतस्यनारायणब
लिविहितैकादशश्राद्धान्तर्गतप्रथमेविष्णुपिंडेजलधारातेनमः । इतिद्वावंजलीदद्यात
७।७।४ॐउपयामगृहीतोस्यंतर्यच्छमघवन्पाहिसोममुरुष्यरायऽएषोयजस्व । अद्या०
प्रेतस्यनारायणबलौ विहितैकादशश्राद्धांतर्गताद्वितीयेशिवपिंडेजल० ते नमःद्वावंजली
दद्यात्२।३३।३२ॐ येनापावकचक्षसाभुरण्यंतंजनांऽअनु । त्वंवरुणपश्यसि अद्या०
प्रेतस्यनारायणबलौ विहितैका० श्राद्धांतर्गततृतीयेसपरिवारयमपिंडेजल० नमः ।
द्विवारम् ३ । ७ । १९ ॐ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सु
क्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमञ्जुषध्वम् । अद्यामुकगोत्र० प्रे० ना० बलौ०
एका० श्राद्धांतर्गतचतुर्थेसोमराज० जल० नमः ४ । ६ । २१ ॐ समुद्रंग

च्छस्वाहांतरिक्षं गच्छस्वाहा देव २ सवितारंगच्छस्वाहा मित्रावरुणौगच्छस्वाहा
होरात्रेगच्छस्वाहा छन्दा २ सिगच्छस्वाहा द्यावापृथिवीगच्छस्वाहा यज्ञंगच्छ
स्वाहासोमंगच्छस्वाहादिव्यंनभोगच्छस्वाहाऽग्निंवैश्वानरंगच्छस्वाहा मनोमेहार्दि
यच्छदिवंतेधूमोगच्छतुस्वर्ज्योतिः पृथिवींभस्मनापृणस्वाहा। अद्यामुकगोत्रस्यामु
कप्रेतस्यनारायणबलौविहितैकादशश्राद्धांतर्गतपंचमेहव्यवाहनपिंडे जलधारा ते
नमः ५ । ३ । ८ । ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्योज्योतिर्ज्योतिः
सूर्यःस्वाहा अग्निर्वर्चोज्योतिर्वर्चःस्वाहा सूर्योवर्चोज्योतिर्वर्चःस्वाहा ज्योतिः
सूर्यःसूर्योज्योतिःस्वाहा। अद्या० प्रेतस्य० ना० बलौ०एकादशश्राद्धांतर्गतषष्ठेसोम
पितृमतिपिण्डेजलधारातेनमः६ । १३ । ४ ॐहिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः
पतिरेकऽआसीत्॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ।अद्या० प्रेत

स्यना०बलौएकादशश्राद्धांतर्गतसप्तमेरुद्ररूपपिंडेजलधारातेनमः७।१।१ । ॐ इषेत्वो
र्जेत्वावायवस्थदेवोवःसवितापार्पयतुश्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याइन्द्रायभा
गंप्रजावतीरनमीवाऽअयक्ष्मा मावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यात
बह्वीर्यजमानस्यपशून्पाहि। अद्या०प्रेतस्यना०बलौविहितैका०श्राद्धां०ताऽष्टमेमृत्युपि
डेजलधारातेनमः८३। ४। १। ॐयज्जाग्रतोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैतिदूरंगमंज्यो
तिषांज्योतिरेकंतन्मे मनःशिवसंकल्पमस्तु अद्या० प्रेतस्यना० बलौविहितैका० श्रा
द्धांतर्गतनवमेपुरुषपिंडेजलधारातेनमः ९।१२।८८। ॐ याःफलिनीर्याऽअफलाऽअपु
ष्पायाश्चपुष्पिणीः। बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः। अपसव्यम्। अद्या०प्रे०ना०
बलौविहितैका० श्राद्धांतर्गतदशमेप्रेतपिंडेजलधारातेमयादी० तांद्विवारम्। सव्यम्
ॐविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात। संबाहुभ्यांधमतिसंपतत्रै

द्यांवाभूमीजनयन्देवऽएकः ॥ अद्या० प्रेतस्यना०बलौविहितैका० श्राद्धांतर्गतएका
दशोविष्णुपिंडेजलधारातेनमः ११ ततोपसव्यम् । ॐ अद्यामुकगोत्रामुकप्रेतपरलोके
महातृषानिवारणार्थम् अमुकदुर्मरणनिमित्तकनारायणबलौविहितविष्ण्वादिविष्णु
पर्यंतमेकादशपिंडोपरिइदमुदकमुपतिष्ठतु एवंत्रिवारंदक्षिणहस्तशंखेनवामेताम्रपा
त्रेणपिंडोपरित्रिवारंजलधारांदद्यात । सव्यम् ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्व
विमुक्त्यर्थंपरलोकेमहाक्षुधानिवृत्त्यर्थम् अमुकदुर्मरणनिमित्तकनारायणबलौविहितै
कादशश्राद्धकर्मणः समृद्ध्यर्थमिमान्येकादशआमान्नानिगन्धपुष्पाद्यर्चितानिसदक्षि
णाकानि विष्णुशिवसपरिवारयमसोमराजहव्यवाहनसोमपितृमद्रुद्ररूपमृत्युपुरुष
प्रेतविष्णूनां तृप्त्यर्थं यथानामगोत्रेभ्यो ब्राह्मणेभ्योदातुमहमुत्सृजे । ततोपसव्येनदश
मं सर्वान्पिंडान्सव्येनैवाघ्रायोत्थापयेत् पिंडाधारकुशानुल्मुकंचवन्हौक्षिपेत् । अद्या०

गोत्रस्य० प्रेतस्य दुर्मरण० नारायणबलिविहितैकादशश्राद्धसांगतासिद्ध्यर्थमिमानि
हिरण्याद्येकादशदानानितत्तद्देवतातृप्तयेना० गोत्रेभ्योब्राह्मणेभ्यो०। हिरण्यंवस्त्रंर
जतंगुडाज्येलवणंतथा। लोहदंडंतिलान्धान्यंमहिषींचामरंददे। ततःॐदेवताभ्यइति
त्रिर्जपेत् ततःपाणिनादीपंनिर्वाप्यहस्तपादप्रक्षालनमाचमनंचकुर्यात् ॐप्रमादादि
तिपठित्वाविष्णुंस्मरेत्। श्राद्धीयवस्तुजलेक्षिपेत्।इत्येकादशश्राद्धविधिः। ततःपुरुषाहा
रपरिमितमन्नंविष्णवेब्रह्मणेशिवायसकिंकरायययमायबलिंदद्यात् तत्रमंत्राः ब्रह्मविष्णु
महादेवायमश्चैवसकिंकरःबलिंगृहीत्वाकुर्वंतुप्रेतस्यचशुभांगतिम्। इतीमंबलिं समर्प
यामीत्युक्त्वाप्रतिदैवतंत्रिविधंफलंसमर्प्यपात्रांतरेशर्करामधुगुडसर्पींषिनिवेदयेत्। दा
लभ्यमतेनबलिदानानि। अथपंचश्राद्धम् तत्रादौसूक्तजपः अथपंचश्राद्धविधिः ॐ त
त्सदद्येत्यादि०अमुकगोत्रस्यामुकप्रेतस्यअमुकदुर्मरणनिमित्तकनारायणबलिकर्मणि ॥२८॥

अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चंदनपुष्पाद्यलंकरणवासोभिर्ब्रह्मविष्णुरुद्रय
माग्नेयसूक्तजपार्थंत्वामहंवृणे । तत्रपूर्वदिनेऽधिवासनंकृतंचेत्तद्दिनेएकभुक्तादिकंविधा
य प्रातःश्वेतवस्त्रयुगेनस्नात्वामध्यंदिनेपुनःस्नात्वा कृतनित्यक्रियआचांतउपविष्टः
पूर्वोपकल्पितंप्रज्वालितंप्रदीपंस्थापितगौरसर्षपतिलादिरक्षोघ्नंश्राद्धदेशमागत्य ॐ
सिद्धमितिपृष्ट्वाकुशत्रयजलेन ॐ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा।यःस्मरेत्पुं
डरीकाक्षंसबाह्याभ्यंतरः शुचिः इतिपठित्वा ॐ पुंडरीकाक्षःपुनात्वितिउच्चार्य श्राद्धदे
यद्रव्याण्यात्मानंचसिंचेत् । ततःकुशत्रयतिलजलैःसंकल्पंकुर्यात् । ॐ अद्येत्याद्यु
च्चार्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरण
निमित्तकनारायणबलौविहितंश्राद्धपंचकमेकोद्दिष्टविधिनाकरिष्ये इतिसंकल्पयेत् ।
ततस्त्रिर्गायत्रींजपित्वा ॐ देवताभ्य इतित्रिर्जपेत् । ततःकुशत्रययवजलान्यादाय

ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुक
दुर्मरणनिमित्तकनारायणबलौविहितपंचश्राद्धेब्रह्मन्निदमासनंतेनम इत्यासनमुत्सृजे
त् । एवंपुनःकुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रेत
त्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्रा
द्धेविष्णोइदमासनंतेनमः इत्यासनमुत्सृजेत् ।पुनः कुशत्रययवजलान्यादाय
ॐ अद्यामुकगोत्रस्यपितु० प्रे० प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनि
मित्तकना० बलौविहितपंचश्राद्धे रुद्रइदमासनंतेनमः पुनःकुशत्रययवजलान्यादाय
ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुक
दुर्मरणनिमित्तकनारायणबलौविहितपंचश्राद्धेयमइदमासनंतेनमः। ततोपसव्यम् ।
मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रामुकप्रेतप्रेतत्वविमुक्त्यर्थमुत्तमलोकावा

प्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौविहितपंचश्राद्धेइदमासनंतेमयादीयतेतवो
पतिष्ठतामिति मोटकरूपासनं तिलजलप्रोक्षितदक्षिणाग्रमुत्सृजेत् । ॐ अपहताऽ
असुरारक्षांसिवेदिषदः इति वामावर्त्तेन श्राद्धदेशे तिलान्विकीर्य ॐ आयंतुनः
पितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः । अस्मिन्यज्ञेस्वधयामदंतोधिब्रुवंतुते
वंत्वस्मान् ॥ इतिमंत्रंपठेत् ॥ ततःपुटकचतुष्टयेसव्येनपंचमेपुटकेऽपसव्येनपवि
त्राणिदक्षिणाग्राणिधृत्वा ॐ पवित्रेस्थोवैष्णव्यौसवितुर्वःप्रसवऽउत्पुनाम्यच्छिद्रे
णपवित्रेणसूर्यस्यरश्मिभिः ॥ इतिमंत्रंचपठित्वा एवंसव्यापसव्याभ्यांपात्रचतुष्टये
पंचमपात्रेच ॐ शंनोदेवीरभिष्टयऽआपोभवंतुपीतये ॥ शंय्योरभिस्रवंतुनः । इतिमं
त्रेणतत्रजलंक्षिपेत् । ततः ॐ यवोसियवयास्मद्द्वेषोयवयारातीरितिमंत्रेणपात्रचतुष्टये
यवान्निक्षिप्य ततोऽपसव्येन ॐ तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः ॥ प्रत्नमद्भिः

पृक्तःस्वधयापितॄँल्लोकान्प्रीणयाहिनःस्वाहेतिपंचमपात्रेतिलान् प्रक्षिप्य ततःक्रमे
णसव्यापसव्याभ्यां तूष्णींगंधंपुष्पंचनिक्षिपेत् ॥ ततःप्रथमार्घपात्रंसव्येनवामहस्ते
कृत्वा पवित्रमन्नपात्रोपरिउत्तराग्रंधृत्वा तदुपरिकिंचिदुदकांतरंदत्त्वाअपरेणाच्छा
द्य। ॐ यादिव्याऽआपःपयसासंबभूवुर्याऽअंतरिक्षाऽउतपार्थिवीर्याः॥ हिरण्यवर्णाय
ज्ञियास्तानऽआपःशिवाःश २ स्योनाःसुहवाभवंतु इतिपठित्वा दक्षिणहस्तेकुशत्रय
यवजलान्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावा
प्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौविहितपञ्चश्राद्धे ब्रह्मन् एष हस्तार्घस्ते
नमः इतिपवित्रोपरिजलंददद‍र्घंदद्यात् । ततः द्वितीयार्घपात्रंवामहस्तेकृत्वा पवित्र
मन्नपात्रोपरिउत्तराग्रंधृत्वा तदुपरिकिंचिदुदकांतरंदत्त्वा । ॐ यादिव्या० वन्तुइति
पठित्वादक्षिणहस्तेनकुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्याद्य० प्रेत०प्रेत

त्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपञ्चश्रा
द्धे विष्णोएषहस्तार्घस्तेनमः इति पवित्रोपरिजलंददर्घंदद्यात् । ततस्तृतीयार्घ
पात्रंवामहस्तेकृत्वा पवित्रमन्नपात्रोपरिउत्तराग्रंधृत्वा तदुपरिकिंचिदुदकांतरंदत्त्वा
ॐ यादिव्या॰ वंतुइति पठित्वाकुशादीन्यादाय । ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपञ्चश्राद्धेरुद्रएषहस्ता
र्घस्तेनमः । ततः चतुर्थार्घपात्रंवामहस्तेकृत्वा पवित्रंभोजनपात्रेउत्तराग्रंधृत्वा तदुप
रिकिंचिदुदकांतरंदत्त्वा ॐ यादिव्या॰ वंतु कुशादीन्यादाय ॐ अद्यामुकगोत्रस्या
मुकप्रेतस्यप्रे॰ र्थममुकदु॰ नारायणबलौविहितपंचश्राद्धेयमएषहस्तार्घस्तेनमः ।
ततोऽपसव्यंकृत्वा पातितवामजानुः पंचमार्घपात्रंवामहस्तेकृत्वातदुपरिपवित्रंभोजन
पात्रेउ॰ त्वा तदुपरिकिंचिदुदकांतरंदत्त्वा ॐ यादिव्या॰ वंतु मोटकतिलजला

न्यादाय ॐ अद्यामुकगोत्रामुकप्रेतप्रेतत्वविमुक्त्यर्थममुकदुर्मरण० बलौ विहित पंचश्राद्धे एषहस्तार्घस्तेमयादीयते तवोपतिष्ठतामिति पवित्रोपरिजलंददद्घंद द्यात् । ततःसव्येनब्रह्मादिचतुष्टयदेवानांपवित्रादिसहितमर्घ्यपात्राणि आसनद क्षिणपार्श्वेब्रह्मणेस्थानमसीतिउत्तानमेवधारयेत् । एवंविष्णवे शिवाय यमायतत्तदा सनदक्षिणपार्श्वेनिदध्यात् । एवमपसव्येन प्रेतासनवामपार्श्वे ॐ पवित्रेस्थानम सीतिन्युब्जंकुर्यात्ततोगंधादिदानम् । सव्येनकुशयवजलान्या० ॐ अद्यामुकगोत्र स्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनाराय णबलौविहितपंचश्राद्धे ब्रह्मन्नेतानि गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेन मः एवंविष्णवादीनामपि । ततोऽपसव्यंकृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुक गोत्रामुकप्रेतामुकदुर्मरणनिमित्तकनारायणबलौविहितपंचश्राद्धे एतानिगंधपुष्पधूप

दीपतांबूलयज्ञोपवीतवासांसितेमयादीयंते तवोतिष्ठंतामितिगंधादिकमुत्सृजेत्। ततः
सव्येनआसनस्यभोजनपात्रस्यचतुर्दिशं चतुरस्रंमंडलंजलेनकृत्वाश्राद्धीयान्नाग्रभा
गंघृतव्यंजनतिलजलयुतंपुटकादौ कृत्वा ततोपसव्येन ॐ इदमन्नमेतद्भूस्वामिपितृ
भ्योनमइत्युत्सृजेत्। सव्येनैवताम्रपात्रेण कराभ्यामादाय मनाक्कुस्थित्वादेवंध्याय
न्पुरुषतृप्तिक्षममन्नंपरिविष्य भूमिस्थपात्रांतरेषु व्यंजनान्युपकल्प्यपुटकस्थितं घृतं
सतिलजलंचोपनीय अन्नोपरिहस्तद्वयोपगृहीतपात्रेण मधुदद्यात् ततः ॐ मधुव्वा
ताऽऋतायतेमधुक्षरंतिसिंधवः। माध्वीर्नःसंत्वोषधीः॥ मधुनक्तमुतोषसोमधुमत्पार्थि
वꣳ रजः। मधुद्यौरस्तुनःपिता। मधुमान्नोवनस्पतिर्मधुमाꣳ अस्तुसूर्यः। माध्वीर्गावो
भवंतुनः ॐ मधुमधुमध्वितिचजपेत्। ततउत्तानहस्ताभ्यामन्नपात्रमालभ्य ॐ
पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा ॐ इदंविष्णुर्वि

चक्रमेत्रेधानिदधेपदम् । समूढमस्यपा ंः सुरे ॥ ॐ कृष्णहव्यमिदंरक्षमदीयमितिप
ठित्वावामेनपात्रमत्यजन् दक्षिणहस्तांगुष्ठमन्नजलघृतेषुनिवेश्य ॐ इदमन्नम् ॐ
इमाआपः ॐ इदमाज्यम् ॐ इदंहविरितिनिक्षिप्य ॐ यवोसियवयास्मद्द्वेषोयव
याराती: इत्यन्नोपरियवान्विकीर्य दक्षिणहस्तेनकुशादीन्यादाय ॐ अद्यामुकगोत्र
स्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनाराय
णबलौविहितपंचश्राद्धे ब्रह्मन् इदमन्नंसोपस्करंतेनमइत्यन्नमुत्सृजेत् । एवंविष्णवा
दीनाम् । ततोऽपसव्यम् ततःपंचमंव्यस्तहस्ताभ्यामन्नपात्रमालभ्यॐपृथिवीतेपात्रमि
त्यादिइदंविष्णु० सुरे ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा वामेनपात्रमत्य
जन्दक्षिणहस्तांगुष्ठमन्नजलघृतान्नेषु ॐ इदमन्नम् ॐ इमाआपः ॐ इदमाज्यम् ॐ
इदंहविरितिनिक्षिप्य ॐ अपहताऽअसुरारक्षांःसिवेदिषदः । इत्यन्नोपरितिलान्विकी

यं दक्षिणेन मोटकादिकमादाय ॐ अद्यामुकगोत्रामुकप्रेतप्रेतत्वविमुक्त्यर्थमुत्तम
लोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौविहितपंचश्राद्धेइदमन्नं सोपस्करं
तेमयादीयतेतवोपतिष्ठतामित्यन्नमुत्सृजेत् । ततःसव्येन गायत्रीं मधुवाताऋचं
जपेत् रक्षोघ्नमंत्रान् कृणुष्वपाजइत्यादिकान् । भूमौतिलान्निक्षिप्य पित्र्यमंत्रपु
रुषसूक्ताप्रतिरथादीनिपठित्वा यथाशक्तिजपेत् । ततः ॐ नमस्तुभ्यंविरूपाक्ष
नमस्तेनेकचक्षुषे ॥ नमःपिनाकहस्तायचक्रहस्तायवैनमः । इति श्लोकमपिपठेत् ।
तत उच्छिष्टसन्निधावास्तृतदक्षिणाग्रकुशत्रयांभूमिं प्रोक्ष्य सर्वप्रकारकमन्नं
तिलघृतसहितं जलेनाप्लाव्य गृहीत्वा अनग्निदग्धा ये जीवा येप्यदग्धाः
कुलेमम ॥ भूमौ दत्तेनतृप्यंतुतृप्ता यांतुपरांगतिम् ॥ इतिकुशोपरितदन्नंपंचसुस्था
नेषुविकिरेत । तत्रपंचमेअपसव्येनविकिरेत् । ततः सव्यंकृत्वाऽऽचम्यहरिंस्मृत्वापिण्ड

स्थानंनिर्माय तन्मध्येवामहस्तेदर्भाग्रंदक्षिणहस्तगृहीतदर्भपिंजूलीमूलेनप्रादेशमा
त्रम् ॐ अपहतेत्यादिनोल्लिख्य चतसृषु सव्येन पंचमेऽपसव्येन। दर्भपिंजूली
मुत्तरतस्त्यजेत्। ततोरेखोपरि ॐ येरूपाणिप्रतिमुंचमानाऽअसुराः संतः स्वध
याचरंति॥ परापुरोनिपुरोयेभरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादितिमंत्रेण पंचसुरेखासु
अंगारं भ्रामयेत्। तत्ररेखाचतसृषुसव्येनपंचमेऽपसव्येनांगारंदक्षिणतस्त्यजेत्। ततः
रेखोपरिप्रत्येकमुपमूलसकृच्छिन्नकुशान् दक्षिणाग्रानास्तीर्य्य सव्येनैवदेवताभ्य इ
तित्रिर्जपेत्। पुटकपंचकेजलयवगंधपुष्पाणिकृत्वापंचमपुटकेयवस्थानेतिलान्कृत्वा
प्रथमपुटकंवामहस्तेकृत्वा दक्षिणहस्तेन कुशादीन्यादाय। ॐ अद्यामुकगोत्रस्यामु
कप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिविहितपंचश्राद्धे ब्रह्मन्पिंडस्थानेऽत्राव
नेनिक्ष्वते नमः। एवंविष्णुरुद्रयमेभ्योऽवनेजनंतत्तदास्तृतकुशेषु दद्यात्। ततःपंचम

स्थानेऽपसव्येनवामहस्तेकृत्वादक्षिणहस्तेन मोटकतिलजलान्यादाय ॐ अद्यामुक गोत्रामुकप्रेत प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारा यणबलिविहितपंचश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्व तेमयादीयतेतवोपतिष्ठतामिति पंच मस्थानेकुशोपरिअवनेजनं दद्यात्। ततस्तिलघृतमधुयुतपिंडान्कृत्वा घृतमधुभ्या मभिघार्य सव्येनैववामहस्तपिण्डं दक्षिणहस्तेनयवकुशादीन्यादाय ॐ अद्या मुकगोत्रस्यामुकप्रेतस्यामुकदुर्मरणनिमित्तकनारायणबलिविहितपंचश्राद्धे ब्रह्मन्ने षतेपिंडोनमः इतिवामान्वारब्धदक्षिणहस्तेनअवनेजनस्थानेपिंडंदद्यात्। एवं विष्णु रुद्रयमानां तत्तदवनेजनस्थाने पिंडंदद्यात्। ततोऽपसव्येनमोटकादिसहितंपंचमपिंडं गृहीत्वा ॐ अद्यामुकगोत्रामुकप्रेतप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्म रणनिमित्तकनारायणबलिविहितपंचश्राद्धे एषपिंडस्तेमयादीयतेतवोपतिष्ठतामि

 तिकुशोपरिअवनेजनस्थाने पिंडं दद्यात् । आस्तृतदर्भमूले करंप्रोञ्छ्य सव्यंकृत्वा
 ऽऽचम्य हरिं स्मृत्वा अपसव्यं कृत्वा ॐ अत्रपितरोमादयध्वं यथाभागमावृषायि
षत ॥ इति पठित्वावामावर्तेनोदङ्मुखोभूत्वामनाक्श्वासं नियम्यतेनैवयथासुखंपर्या
वर्त्तयन्पितरंभास्वरमूर्तिंध्यायन् ॐ अमीमदन्तपितायथाभागमावृषायिषेतिपठेत् ।
ततःसव्यं कृत्वा अवनेजनावशिष्टजलयुतं पात्रं वामहस्तेकृत्वा दक्षिणहस्तेनयवकु
शादीन्यादाय ॐ अद्याऽमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावा
प्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलिविहितपंचश्राद्धपिंडे ब्रह्मन् प्रत्यवनेनिक्ष्व
तेनमः । एवंविष्णुरुद्रयमादीनांप्रत्यवनेजनंपिंडोपरिदद्यात् । ततःपंचमपात्रमपसव्ये
न वामहस्ते कृत्वा दक्षिणहस्तेन मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यामु
कप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलिवि

हितपंचश्राद्धपिंडेऽत्रावनेनिक्ष्वते मयादीयते तवोपतिष्ठतामिति पिंडोपरि प्रत्यवने
जनंदद्यात्। ततोनीवींविस्रस्यसव्यं कृत्वाऽचम्यहरिंस्मृत्वावामेनपाणिनाधृतंसूत्रंदक्षि
णहस्तेनगृहीत्वा ॐ एतत्तेब्रह्मन्वासः। इतिपिंडोपरिसूत्रंधृत्वा। एवंविष्णुरुद्रयमा
दीनाम्। ततोऽपसव्येन ॐएतत्तेपितर्वासः। ततःसव्यंकुर्यात्। दक्षिणहस्तेनकुशत्रय
यवजलान्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थमुत्तमलोका
वाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलिविहितपंचश्राद्धेब्रह्मन्एतद्वासस्ते मया
दीयतेनमः इत्युत्सृजेत्। एवंविष्णुरुद्रयमानाम्। ततोऽपसव्येनमोदकतिलजलान्या
दाय ॐ अद्यामुकगोत्रामुकप्रेतप्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनि
मित्तकनारायणबलौविहितपंचश्राद्धपिंडे एतद्वासस्तेमयादीयते तवोपतिष्ठतामित्यु
त्सृजेत्। सव्यम्। तूष्णींगंधपुष्पधूपदीपतांबूलानिप्रत्येकंपिंडेदद्यात्। ततःपिंडशे

षान्नं तत्तत्पिंडसमीपे विकीर्य। ततोदेवान्पात्रे ॐ शिवा आपःसंत्वितिजलम्। ॐ सौम
नस्यमस्त्वितिपुष्पम्। ॐ अक्षतंचारिष्टमस्तुइतितंडुलान् सव्यापसव्याभ्यांक्रमे
णदद्यात्। कुशद्वययवजलान्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमु
क्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्राद्धेब्रह्म
णःदत्तैतदन्नपानादिकमक्षय्यमस्तु॥ एवं विष्णवादीनामक्षय्योदकं दद्यात्॥ ततो
पसव्येन मोटकतिलजलान्यादाय॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमु
क्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्राद्धे दत्तै
तदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकंदद्यात्। सव्यम्। अघोरःपिताऽस्त्वितिद
क्षिणांदिशंपश्यन् पिंडोपरिपूर्वाग्रांजलधारां दद्यात्। ततः पूर्वाभिमुखीभूय ॐ गोत्रं
नोवर्द्धतामितिवदेत् ॐ वर्द्धतामितिप्रतिवचनम्। ॐ दातारोनोभिवर्द्धतांवेदाःसंततिरे

वच । श्रद्धाचनोमाव्यगमद्बहुदेयंचनोभवेत् अन्नंचनोबहुभवेदतिथींश्चलभेमहि । याचि
तारश्चनः संतुमाचयाचिष्मकंचन ॥ एताः सत्या आशिषः संत्विति आशिषोब्राह्मणंयाचे
त् । ॐ संत्वितिब्राह्मणप्रतिवचनम् । ततः पिंडोपरिसपवित्रकुशान्धृत्वा पुटकादिस्थितं
जलंगृहीत्वा ॐ उर्जंवहंतीरमृतंघृतंपयः कीलालंपरिस्रुतम् । स्वधास्थतर्पयतमेपितरमि
तिप्रत्येकंपिंडोपरिदक्षिणाग्रांजलधारांदद्यात् । ततः पिंडोपरिअंजलिदानंकार्यम् । ॐ
अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनि
मित्तकनारायणबलौविहितपंचश्राद्धे परलोकेमहातृषानिवृत्त्यर्थंद्वाभ्यांद्वाभ्यांमंत्रा
भ्यां पिंडोपरिएकैकांजलिदानमहंकरिष्ये । सव्यम् । ॐअग्निमीडेपुरोहितंयज्ञस्यदेव
मृत्विजम् । होतारंरत्नधातमम् ॥ १ ॥ ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराज
न्यः शूरइषव्योतिव्याधीमहारथोजायतां दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा

जिष्णूरथेष्ठाः । सभेयोयुवास्ययजमानस्यवीरोजायतांनिकामेनिकामेनःपर्जन्योव
र्षतुफलवत्योनऽओषधयःपच्यंतांयोगक्षेमोनःकल्पताम् ॥ २॥ तत्सद्ब्रह्मेत्यादि०गोत्र
स्य प्रेतस्य ना० प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनाराय
णबलौविहितपंचश्राद्धेपरलोके महातृषानिवृत्त्यर्थं प्रथमे ब्रह्मपिंडे जलधारा ते नमः
ॐइषेत्वोर्जेत्वावायवस्थदेवोवः सविताप्रार्प्पयतुश्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्या
इंद्रायभागंप्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघश ँ सोध्रुवाऽअस्मिन्गोप
तौस्यातबह्वीर्यजमानस्यपशून्पाहि ।१।१।ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढ
मस्यपा ँ सुरे स्वाहा ॥ २॥ ॐ अग्नऽआयाहिवीतयेगृणानोहव्यदातये । निहोतास
त्सिबर्हिषि ॥ ३ ॥ नमः शंभवायचमयोभवायचनमः शंकरायचमयस्करायचनमः ॥३६॥
शिवायचशिवतरायच ॐ शन्नोदेवीरभिष्टयऽआपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः

ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः १ ॐ प्रेता
जयतानरऽइन्द्रोवः शर्मयच्छतु उग्रावःसंतुबाहवोनाधृष्यायथासथ२ अपसव्यम् ॐ
अद्यामुकगोत्रामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्त
कनारायणबलौ विहितपंचश्राद्धे पंचमे प्रेतपिंडे जलधारा ते उपतिष्ठतु ५ इति तिल
यवदुग्धसर्वौषधीतुलसीदलहिरण्यमिश्रोदकेन दक्षिणहस्तशंखेनजलधारांदद्यात् ।
ततस्तेनैवोदकेनॐ अद्यामुकगोत्रामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थं
ममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्राद्धे पिंडोपरि इदमुदकमुपतिष्ठतु
एवंत्रिवारं कुर्यात् । ततःपिंडमाघ्रायउत्थापयेत पिंडाधारकुशानुल्मुकंचवह्नौक्षिपेत ।
सव्येनार्घ्यपात्रचतुष्टयंसंचाल्याऽपसव्येनपंचमार्घ्यपात्रमुत्थाप्य सव्येन कुशात्र
ययवजलान्यादाय दक्षिणाद्रव्यंचादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्ववि

मुक्त्यर्थमुत्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्रा
द्धेकृतैतद्ब्रह्मणः श्राद्धप्रतिष्ठार्थइदंहिरण्यमग्निदैवतं यथानामगोत्रायब्राह्मणायदक्षिणां
दातुमहमुत्सृजेइतिदक्षिणांदद्यात् एवंविष्णुरुद्रयमादीनाम् । ततोऽपसव्यं मोटकादी
निदक्षिणाद्रव्यंचादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थमुत्तम
लोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्राद्धे कृतैतत्प्रेतस्य
श्राद्धकर्मणःप्रतिष्ठार्थमिदंरजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दा
तुमहमुत्सृजे । ततःकलशसंकल्पः । ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यो
त्तमलोकावाप्त्यर्थममुकदुर्मरणनिमित्तकनारायणबलौ विहितपंचश्राद्धे ब्रह्मलो
कप्राप्त्यर्थं ब्रह्मप्रीत्यर्थं तीर्थवारिपूरितंसफलंवस्त्रोपवीतान्नप्रतिमानालिकेरसहित
मिमंताम्रकलशंब्रह्मदैवतं ब्रह्मसूक्तजापिनेऽमुकगोत्राय अमुकशर्मणे ब्राह्मणाय

तुभ्यमहं संप्रददे। तेन ब्रह्माप्रीणातु १। एवं विष्णुरुद्रयमानां च तत्तल्लोकावा
प्त्यर्थंतत्तद्देवताप्रीत्यर्थं तत्तत्सूक्तजापिनेदद्यात्। तत्र चात्र यमलोकनिवृत्त्यर्थ
मितिज्ञेयम्। अद्यामुकगोत्रस्येत्यादि० पंचश्राद्धे प्रेतलोकनिवारणार्थं तीर्थवारिपू
रितमित्यादि॥ भूमिं सस्यवतीं धेनुं सुवर्णं च तिलान् क्रमात्। वृषभं सहि
रण्यं च पंचश्राद्धेषु दक्षिणाः।१। ततोनारायणिबलिसांगतासिद्ध्यर्थमृग्वेदिने स
स्योपेतांभूमिं यजुर्वेदिनेपयस्विनींधेनुं सामगायसुवर्णमथर्ववेदिने तिलसहितंलो
हंच दक्षिणांदद्यात्। उत्तमदक्षिणाभावेसर्वेषांतुष्टिकरंयथाशक्तिहिरण्यंवादद्यात्।
ततोयथाशक्तिपददानंघृतपात्रदानंतिलपात्रदानादिकंचकार्यम्। ॐ देवताभ्यइति
त्रिर्जपेत्। ततोपसव्येनपाणिनादीपंनिर्वाप्य हस्तपादप्रक्षालनमाचमनंचकुर्यात्।
ॐ प्रमादादिर्तिपठित्वाविष्णुंस्मरेत्। श्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत्।

जलेवाक्षिपेत् । अद्येत्यादि० नारायणबलिकर्मणःसांगतासिद्ध्यर्थं यथाशक्तिब्राह्म
णान् भोजयिष्ये । ॐ अद्यामुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थममुकदुर्मरण
निमित्तकनारायणबलिकर्मणिन्यूनातिरिक्तदोषपरिहाराय नानानामगोत्रेभ्यो ब्राह्म
णेभ्यो दीनानाथेभ्यः अंधपंगुभ्यःयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजे अन्य
गोशय्यादिनाब्राह्मणान्संतोष्यानेनकर्मणाश्रीभगवान्विष्णुरिमं प्रेतं शुद्धमपा
पमगर्हितंकरोत्विवितिवाचयित्वा स्वयंस्नात्वा गृहेगत्वा गणपतिंसंपूज्यपुण्याहंवाच
यित्वा गुडशर्करापायसादिस्वजनैःसहभुंजीत । शुभमरणस्यापिअयंविधिर्यथासं
भवंकृत्वापारलौकिकंकुर्यात । छागलेयः–नारायणबलिः कार्योलोकगर्हाभयान्नरैः ॥
तथातेषांभवेच्छौचंनान्यथेत्यब्रवीद्यमः ॥ व्यासः–नारायणंसमुद्दिश्यशिवंवायत्प्रदीय
ते ॥ तस्यशुद्धिकरंकर्मतद्भवेन्नैतदन्यथेति । सचात्मघातादिप्रायश्चित्तंकृत्वाकार्यः । हे

माद्रौषड्विंशन्मते--कृत्वाचांद्रायणंपूर्वंक्रियाकार्यायथाविधि । नाराणबलिःकार्यो
लोकगर्हाभयान्नरैः॥ पिंडोदकक्रियापश्चाद्वृषोत्सर्गादिकंचयत् । एकोद्दिष्टानिकुर्वीत
सपिंडीकरणं तथेति॥नारायणबलिःकार्योलोकगर्हाभयान्नरैः। एकादश्यांचशुक्लायांपं
चम्यां श्रवणेनवेति ॥एतेषामन्यतरेकालेपूर्वेद्युःतदहरेववादुर्मरणजनितदोषपरिहारार्थं
प्रायश्चित्ताचरणंकुर्यात् । देवराजदेवीयेतु--नारायणबलिक्रियाधिकारार्थंवीरभो
जनमप्युक्तम् । तत्रसंक्षेपेणप्रयोगः । देशकालौसं० अमुकनामधेयस्यदुर्मरणदोषनि
वृत्तिपूर्वकप्रेतत्वविमोक्षार्थंनारायणबल्यधिकारार्थंचवीरभोजनंकरिष्ये । द्वादशाष्ट
चतुरोवाविप्रान्संपूज्यभोजयेत् ।भोवीरस्वरूपब्रह्मन्निदमासनम् । रक्तगंधकरवीरपुष्प
सिंदूरधूपदीपादिभिःसंपूज्य पात्रेअन्नंपरिविष्य अभ्युक्ष्य भोवीरइदमन्नंपरिवि
ष्टंपरिवेष्यमाणं चातृप्तेःस्वाहाहव्यंनममेत्युक्त्वाजलंविसृज्यप्रार्थयेत् । पृथिव्यांयेस्थि

तावीराः प्रेतमोक्षप्रदायकाः । प्रलयानलमुख्यास्तेगृह्णंत्वन्नादिकल्पितम् ॥ १ ॥ यतारिक्षे
स्थितावीराःप्रेतपिंडविधायकाः । यातुधानास्तुतेप्रेतमन्नमश्नंतुकल्पितम् ॥ २ ॥ येद्यौलो
केस्थितावीराः प्रेतस्यगतिकारकाः ॥ मयाकल्पितमन्नादिप्राश्नंतुपूजिताःसदेतिप्रा
र्थ्यभुक्तवत्सुद्विजेषुदक्षिणांतांबूलंचदत्त्वा नमस्कृत्याशिषोगृहीत्वाविष्णुंस्मरेदितिवीर
भोजनविधिः ॥मिताक्षरास्मृत्यर्थसारयोर्होमतर्पणबलयोनोक्ताः । ततःप्रतिदैवतंत्रिवि
धंत्रिविधफलंसमर्प्यशर्करामधुघृतगुडानिनिवेद्य पिंडानभ्यर्च्यविसर्जयेदित्यत्रविशे
षांतरंश्राद्धचिंतामणिश्राद्धसागरदेवजानिनिर्णयस्मृतिकौस्तुभस्मृत्यर्थसारमिताक्षरा
नारायणभट्टकृतांत्येष्टिपद्धतिविश्वनाथीक्रियापद्धतिसंस्कारप्रकाशनिर्णयासिंध्वादिषु
ज्ञेयम् । इतिश्रीगदाधरदीक्षिताद्यंत्येष्ट्युदाहृतयत्किंचिच्छौनकबोधायनगारुडानुसारी
समंत्रकनारायणबलिप्रयोगः समाप्तः ॥

॥ अथ सामग्री लिख्यते ॥ ॥ १६ ॥ प्रायश्चित्तगोदान मृत्तिका गोवर५कुशामुठा २५ ॥सेर चावल २ सेर तिल२सेर जव घसा चंदन धूप बत्ति ६दीपबत्ति मालाफूल १ । सेर पेडा बतासा । ऋतुफल ५० पान १०० सुपारी ६ वर्णिद्वस्त्र ६ उपवस्त्र ६ आसन ६ लोटा ६ लोटिया ६ आचमनी ६ पवित्री ७ नारियर १ सफेदवस्त्र थान ६ कलश तांबेका ६ ढकना पंचपल्लव पंचामृत पंचगव्य पंचरत्न सप्तमृत्तिका १ सर्वौषधिपै ७ सोनेका टूक १ प्रतिमा सोनेकी १कासेकी थालि ६ धोती ६ डुपट्टा १ तांबेका कोपर १ वटलोही सँडसी चिमटा पंखा ३ सेरघृत खांड अधासेर २ सेर दूध १ शंख पीली सरसों पैसाभर२५जनेउजोडा सुतअधेलाभर शहत छटाक ११ आमान्नसेर २२ एकादशदान सोना वस्त्र चांदी गुड घृत नोन लोहदंड तिलधान माहेषी चवर १२५ दोनीया छोटी ५० पतापत्तल छोटी २५प्रतिमा सोनेकी प्रतिमा

चांदीकी प्रतिमा तांबेकी प्रतिमालोहेकी प्रतिमासीसेकी वा कुश ऋग्वेदिनेभूमिःयजुर्वेदिनेपयस्विनी सामवेदिनेसुवर्णम् अथर्ववेदिने तिललोहम् पददानम् १३ आसन १३ जूता १३ छाता १३ पवित्रि १३ पात्र उपपात्र १३ थालीकांसेकी १३ नया पीडा १३ वस्त्र उपवस्त्र १३ पेडा तिलपात्रदान छायापात्रदान आचार्यदक्षिणा ब्राह्मणभोजन इति सामग्री ॥

॥ इति सामग्री ॥

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

इति

नारायणबलिः

समाप्तः

❖❖❖❖❖❖❖

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.